पिबिभर्त्ति निस्सीमिजे॥४॥ इति दक्षिणतो विमानमानयन् सानंदं विलोकयसखे विपिनानाममीषां परमं रामणीयकं॥ पुरः पुरो घनं नूनं वने वने
महागिरिर्म[illegible]मे महागिरौ विराजते गुहागृहम्॥ गुहागृहे गुहागृहे विहारतत्परो हरिर्हरौ हरौ निरंकुशः कृतेभसाध्वसो ध्वनिः॥५॥ कु॰॥
किमरवर्ण यस्य चाक्षुष्याणि मनुष्यागकवलनचपलचंडपुंडरीकाननानि कानननानि॥ इतस्तावद्भ्राव्यतिकरद्भुतः संत्यज गराइतो लुटाक
नास्समुद्यद्भुतकंटकचयः॥ इतो व्याघ्राउग्राज्वलनजनकावेण वद्भुतो वनं संलक्ष्यैतन्मनइद्दमहोमोहमयते॥६॥ वि॰॥ सरवे निकुंजनिरू
पणतएतेषां गुणानपि गृहाण॥ अनायासग्राह्याण्यवनिपतिभोग्यान्यपि फलान्यपत्नेनप्राप्यानृपसुदृगपेस्याः सुमनसः॥ असूर्यपश्या
न्यप्यहह सुलभान्यस्मभवनान्यरण्यानी भाजामति पतति भाग्यं किलगिरः॥७॥ अपिच॥ गहनगुहाविहारिहरिपाणिरुहाभिहतद्विरद शिप
स्तटोच्छलितमौक्तिकसंहतिभिः॥ अहह विभूषितैरिह चिरं विरहं तिसुखं सममबलाजनैरतिविलासपराः शबराः॥८॥ इति व्योमयानं द
क्षिणतः प्रापयन् पुरतो निर्दिश्य॥ कंठोपरि कंठीरवश्मश्रुचिदंष्ट्रारुचि विचित्रचंद्रिकया॥ स्फटिकाचलद्वन यनेघटिकाचलएष संप्रति धिनो
ति॥९॥ सभक्तिप्रकर्षमंजलिंबध्वा॥ वरकेतुस्थतास्पर्ध्या यस्मरकेलिपुषेश्रियः॥ नरकेक्षणविध्वायनरकेसरिणेनमः॥१०॥ किंच॥ स्थिरशं
खादिचिन्हाय स्फुरसंघार्चितांघ्रये। परसंहारदक्षाय नरसिंहाय मंगलम्॥११॥ जंभदंभहरक्षेमारंभलंभनमूर्त्तये॥ शंभुसंभावनीयाय स्तंभ
डिंभायमंगलम्॥१२॥ कु॰॥ किमरेक्रोधमये पिनरमृगेंद्रस्तव वचनविरचयेसि॥ प्रल्हादमाल्हादयितुं तमेकं सर्वस्य कुर्वन्भुवनस्य भीतिम्॥ टि

१ मायांनि २ दरीरासस्व श्व ३ कुलेवेणु श्व ४ श्रृंगबंधव श्व ५ प्रत्यंतपर्वताः चरणाश्च ६ शेषाचले ७ विद्युत्प्रभा लक्ष्मी ८ विद्युदपि ९ संचयः १० तस्करः ११ नरकावलोकनं १२ शत्रुणा ३ इंद्र ४

सिंहं[1]देहे[2]संहननंपुरमपस्त्वबलत्वस्तत्रकथंप्रवृत्तः॥१३॥ वि०॥ वयस्यमैवंवादीः॥ यतः॥ अपुण्यधोरै[3]यहिरण्य[4]दनत्रिलोकशोकसमर्पणा[5] यच्छौरिः॥
कीर्णाधवायासनिरासदंभस्तंभादिहाजृंभतसंभ्रमेण॥१४॥ इदंचावधार्यताम्॥ मनुष्यतिर्यक्त्वमुपेत्यनिस्पोरैवः स्वयंस्थावरतोऽभ्युदेत्॥ विनि
अशक्तत्वन्वयमत्रवेदैः प्रस्ताप्यमानं प्रकटीकरोति॥१५॥ पुनः सविश्रंभम्॥ घटिकाचलबपुरवेक्ष्यत त्वं वो घटिकाञ्चलेसमधिरुह्य भक्तितः॥
नरकेसरींद्रचरणौविलोकयन् नरकेसरिष्यतिनजातुमानवः॥१६॥ इतिविमानमन्यतः संचारयन् सहर्षम्॥ वीक्षारण्यमिदंवदतिसरसी
हृत्तापनाशिन्यसावुस्यारोधसिवीरराघवइतिप्रख्यातनामाहरिः॥ व्यक्तंराजतिवीतिहोत्रइववपोविस्तीर्णहेतिद्युतिः सेत्रप्राप्तुमुकुशस्थलेभ
भजतिश्रीशालिहोत्रार्चितम्॥१७॥ आकल्पतुभवानत्रैमंचमत्कारं॥ द्विरेफवर्णोसुमनोरमांतनुंबिभर्ति संस्तामि वीरराघवः॥ सैपर्वराजेनय
शीयमर्चितमुखंपदद्वंद्वमिवोपशोभते॥१८॥ कृ०॥ वयस्य किं सन्न ह्यसि वीरराघवस्तवने॥ य दस्मिन्नपि पन्नगनगनाथद्वय परधनश्रद्दणप
रत्नाद्यैः प्रादुष्यंति दोषाः॥ वि०॥ अत्रास्मदुक्तेनैवतत्समाधानेनपुनस्त्रापि संतोष्टव्यमायुष्मता॥ पामरमतेरमतेनकस्यमनोवीरराघवेदेवे
॥स्वस्सासाधुप्रजगन्न निःस्तनुपल्लाप्ताकितोरःस्थलः साक्षादेषपरःपुमान् कृतनुतिर्दाक्षायणीशादिभिः॥ वीक्षारण्यपतिर्विराजतिगतिः
स्नामदकुसंहितीभीसात्पापुररोगनाधनयशोभोक्षाद्यपेक्षावताम्॥१९॥ किंच॥ उपेत्यवीक्षावनमुन्नतःसरोस्फुवर्णवल्यास्सुमनःपुषाश्रितः
॥वेहीनसेव्योहरिचंदनस्तनोत्यपाश्रितानामुचितांसुवासनाम्॥२०॥ इत्यन्यतोविमानंप्रेरयन्नग्रतोवीक्ष्य॥ सप्रत्यभिज्ञम्॥ एषभूतपुरीनि
रासितंवरीदोषपदंभीमयाश्रीमानत्रगुणाब्धिराविरभवद्रामानुजार्योमुनिः॥ चर्व्यंतामृतसिंधुमंथनभवद्धैयंगवीनात्मके विज्ञानेपदुष्पैः

१ सिंहस्य २ शरीर ३ पुरीणः ४ हिरण्यकशिपुः ५ नाशाय ६ कयाधोरपत्यंप्रल्हादः॥ ७ घटिकाचंचलम् ८ खड्गज्वलाच ९ मुनिः १० भ्रमरः रेफद्वयंच ११ इन्द्रः चैन्द्रस्थ १२ प्रादुर्भवति १३ साहित्यं १४ सुवर्णलतातनाम्न्यापत्न्या १५ उत्तमाः सर्पश्च १६ अवलोकिता १७ सआचार्यएवआह्लानकारणंयस्य॥

मेषविदुषामद्यापि विद्योतते ॥ २१ ॥ किंच ॥ कामादिवैरिगणभीमानवद्यनिजनामाभिलाषगरिमावैमानिकार्यसमभूमा मतौ वचनसीमातिलंघिमहिमा ॥ श्रीमाननुनककलसीमाननो विमलधामावमानितरविः क्षेमाणि जृंभयतु भूमावमुत्र च स रामानुजो यतिपतिः ॥ २२ ॥ अपिच ॥ सजयति रामानुजयतिर्जयति परवादिनं यदीयोक्तिः ॥ संजयति बाधमनघं जयति बुधान्यथाश्च भंजयति ॥ २३ ॥ तेमीमांसाशास्त्रप्रमथनपरिकलितबुधजनैर्बाभिदाः ॥ लक्ष्मणमुनेः प्रबंधा लक्ष्मणपूर्वजशरादुवजयंति ॥ २४ ॥ अत्र कश्चित्पश्चिमो विपश्चिता मित्थमेनमनुदिनं प्रणमति ॥ रामानुजाय गुरवे नरवेषभाजे शेषाय धूतकलये कलये प्रणामान् ॥ योमादृशानपि कुशान् परिपातुकामो भूमाववातरदुदंचितवीधभूमा ॥ २५ ॥ एतच्चाकर्ण्यताम् ॥ श्रीमानुजो यामुनतीर्थसेवापरावुरी तौ नैरं कं निरोद्धुम् ॥ तयोः पुराणः प्रणिनाय गीतां तस्यानवीनस्तततलवीकाम् ॥ २६ ॥ कू॰ ॥ सत्यमेवं तथापि तत्त्वया नु विधायि नाममेधाविनामपि पराबमंतृत्वात् योदोषाः प्रसिद्धाः ॥ तथाहि ॥ श्रीरामानुजदर्शनैकरसिकैः शिष्टैः प्रकृष्टैर्गुणैः पूर्णानां विदुषां मतां तरजुषां पंक्तौ न भुंक्ते कचित् ॥ हा हंतौदनमंततः शुचितमं तद्दृष्टमाप्यस्त्यजत्यास्तां तत्त्वमतेस्थितैरपि समं प्रायेण नाश्नात्यसौ ॥ २७ ॥ अपिच ॥ तेषां न्याय्यद्दृहहिजान्वयजुषां भाषाप्रबंधेश्रमो वेदे विश्वपुमर्थसाधनविधौ कश्चादरो जाग्रति ॥ तीर्थं श्रीरंपयोनिधेस्मगनोदेत्यारिदीप्त्या वृते कोवाधावति दुग्धलब्धिचपलो मापालकस्यालयम् ॥ २८ ॥ किंच ॥ एतन्मतानुवर्तिनां केषांचिदेषांचेष्टा नेष्टा वैदिकानाम् ॥ पश्य ॥ मुचंतः पंचयज्ञान् द्रविडभणितिभिर्मोहयंतो नभिज्ञान्निंदंतो हंत यज्ञानसकृदपि हरेर्वंदनं वारयंतः ॥ लुंपतः श्राद्धचर्यां यतिमपि गृहिणो वंदनं कारयंतः संहृष्यं धारयंतः कतिचिदविहितैरेव कालं क्षिपंति ॥ २९ ॥ किंच ॥ घंटाघोषं त्यजंतो हरिपरिचरणे सर्वलोकावगीतं ख्यातं ॥ टी॰ १ अजवलरोति २ उत्पादयतिपंज संगेत्य स्य सूपं संवधातीत्यर्थः ३ रामपक्षेवेदमीदृतिच्छेदः मांसाशाः रासाः मीमांसा शास्त्रं ४ देवपंक्तितौ ५ रामानुजरूपौ ६ यामुनतीर्थो गुरुर्यमुनासंबंधिनी तीर्थं ७ निरयासरौ ८ एवकारमेव भगवद्वंदनं कार्यमिति तत्संप्रदायः ९ संतंवेषं सतां हृष्यं च ॥

॥ ७ ॥ ॥ १

त्रैलोक्यमातुः श्रुतिभिरभिहितं वैभवं खंडयंतः॥ संकेतः श्रद्दधैव स्वचरणसलिलं स्वीयगोष्ठ्यां पिबंतः केचिद्दिग्लावयंते जगदभिदधतः केशवं चे
वमोघम्॥३०॥ अपिच॥ यज्ञाः पंचमहत्पदेन सहिता ये चापरे विश्रुता यत्कर्मग्रहसंक्रमादिसमये सर्वे बुधाः कुर्वते॥ तत्सर्वं विसृजंति काम्यमिति
यत्रस्यं तद्विध्वंसकास्ते हि नित्यतयाश्रितेयदृशने याचव्य वायक्रिया॥३१॥ अन्यच्च॥ विदुषामपि मोहमावहंतो वितथैतिह्यसहस्रवर्णनेन॥ विन
याभिनयात्प्रबलाः किलामी विजयंते कपटालया जगंति॥३२॥ किंच॥ यस्यां नास्ति पुरस्कृतिर्नयविदां यज्वानुहासास्पदं पूज्यं ते च निरस्य याः
पुनरमी सांकेतिकाचार्यकाः॥ वेदानामवहेलनं व्यतिहतावर्णाश्रमप्रक्रिया गोष्ठ्यै दुष्कलिपुष्कलीकृतपुषे कस्यैचिदस्यै नमः॥३३॥ किंबहुना॥ ५
मायेयेषामसकृदकरणे प्रत्यवायोस्ति भूयान्यज्ञादींस्तानिह विजहति स्पष्टवेदोपदिष्टान्॥ कर्मैवामी विदधति जडाः किंतु संकेतसिद्धं कष्टं क
ष्टं बत हतकलेः कश्चिदुन्मेष एषः॥३४॥ नगाहंते गंगामपि नटजटीसार इति येन मज्जंत्यंभोधौ लवणरसवेशंतकेद्रुति॥ नये चैवं गव्यान्यपि पयः
शकृत्सार इति हापि बंत्येषां दोषान्क इह निपुणः स्याद्गणयितुम्॥३५॥ वि०॥ किमरे कलंकलेशरहितेषु श्रीमद्रामानुजदर्शननिष्ठेषु गरिष्ठेष्वपि स
न्नह्यसि॥ अथवा भवादृशानां कृशविवेकानां का नाम मर्यादा॥ उक्तं हि॥ अनल्पकंधरा या हि सर्वज्ञस्यापि दारुणाः॥ आरोपयंति मालिन्यं का
कोलानुवते खलाः॥३६॥ इति पश्यता वदते तेषां पवित्रं नर्मचरित्रम्॥ उच्छिष्टान्यतिदूरतः परिहरंस्त्यक्तुं त्यसत्संमति प्राणापत्स्वपि बाधवेनर
गृहे प्राश्नंति नापोप्यमी॥ काम्यं निर्मिमते न कर्म भगवत्कैंकर्य एवास्थिताः सत्त्वस्थैः स्पृहणीय एष जयति श्रीवैष्णवानां क्रमः॥३७॥ किंच॥ भा
ले शुभ्रमृदूर्ध्वपुंड्रतिलकः पद्माक्षमाला गले दिव्यं शंखरथांगचिह्नमनिशं दीप्तं भुजामूलयोः॥ वक्त्रे शौरिगुणैकवर्णनपरा वाचस्तदेनो मुषामे
तेषां हरिभक्तितुंदिलहृदां वीक्षापि मोक्षावहा॥३८॥ दोषारोपणं चैतेषु त्वदीयमुपहास्यम्॥ टी० १ स्वातंत्र्येण शक्तिपूजनं कार्यमिति तत्सिद्धांतः
२ संसदि ३ पंचमहायज्ञाः ४ सूर्यचंद्रोपरागौ ५ दृष्टिविकासः ६ शिवः ७ संचयः ८ महांतपक्षे अनल्पकंधरायामिति च्छेदः कंधरायां ग्रीवायां ९ शिवः बहुश्रुतश्च

तथाहि॥ दृष्टा स्वबांधवजनादितरैरदृष्टं यद्भुज्यते न च मिह लक्ष्मण पक्षविज्ञाः॥ दोषः किमेष दुरितापहरो गुणो वेत्ये वं विविंच्य परिपृच्छत गुणज्ञान्॥३९॥ किंच॥ दृष्टं बंधुभिरितरैः सतामनं दत्तादोषोयं एषोपरैः शिष्टैः स्पृष्टमन श्नतामिह महाराष्ट्रादिकानां समः॥ एषां दूषयितानकोपि निपुणाहारः परं तु हि जनः सर्वाशीन तु दूषणं हितभुजां तेषामिदं भूषणम्॥४०॥ यश्च शठारिप्रभृतिसत्वस्थमुनिनिर्मितदिव्यप्रबंधाध्ययनेन तत्त्वादितः सोपमितिहासपुराणादिभिर्वेदमुपबृंहयन्नज्ञानेरावृतेश्शृणुवावत्॥ बकुलविभूषणेन गुरुणा करुणानिधिना श्रुतिमुकुटाविसृष्ट्यमवधार्य परं गहनम्॥ रचितमिह प्रबंधमनुसंधतां कथितं समग्रमपि दूषणं स्मृतिपुराणमधीतवताम्॥४१॥ किंच॥ उपादेयं प्राज्ञैः रुचिनविषयं द्राविडवचोप्यमुष्मात्तथं हेयं भवति वचनं संस्कृतमपि॥ हरिर्विश्वं त्वं तेस्य नतिसुभगोपि स्तुतिपदं न सद्रूपोप्यंतः करणधृतनारीस्तनभरः॥४२॥ वस्तुतस्त्वगस्त्यव्याकरणानुशिष्टानामनवद्यशिष्टपरिग्रहविशेषप्रकृष्टानां द्राविडशब्दानां कोनामसंस्कृतादपकर्षः। अपभ्रंशाः स्युः सा व्याकर्त्तानुलक्षितसमुद्रो मुनिवरः प्रबंधाः प्रौढाः शठमथनमुख्याः शमधनाः॥ प्रवक्तारः श्रद्धाः प्रथितयशसः पूर्वगुरवो गिरां पारेनासां प्रतिगरिमा द्राविडगिराम्॥४३॥ यश्चैकदेशविषयदूषणोपन्यासस्तत्राप्याकर्ण्यताम्॥ कतिचिदलसाः कर्माभ्यासासहायविनिश्चलास्तदपि भगवद्भक्तिस्तेषां धुनोतिभवव्यथाम्॥ श्रमसहजनैकाहैर्नृणां विनैव हि लंघनैर्ज्वरनिरसनायालं वीर्यान्तरं परमौषधम्॥४४॥ किंच॥ रहस्यव्याख्यानैरघुवरचरित्रानुकथनैस्त्रयींसध्रीचीनां बकुलधरवाचां प्रवचनैः॥ अमीभाष्यारव्यानैर्हरिचरणकैंकर्यविधिभिः प्रमाणेश्वा यीणां क्षपणमिव नयंत्यत्रदिवसान्॥४५॥ पुनः सक्षणमनुध्यापनं सश्लाघम्॥ अन्यदास्तांनामतामेवकाममन्योन्यकरुहायमानानांनाविं

१पृथक्पृथग्विचार्य २अनशनमकुर्वताम् ३शठारिनामांतरं ४उपनिषत्तात्पर्यंनिश्चित्य ५धारयत ६रूपः ६साधारणसुंदरोपि ७लावण्ययुक्तः ८आस्यः द्राविडभाषेपर्यंगस्त्य मुनिप्रणीतं व्याकरणमस्ति ९ग्रंथकर्तारः १०कर्माभ्यासमहनासमर्थाः ११स्थिरचेतसः १२श्रमसहकारिणो १३नैकाहा अनेकदिवसाग्येषु तैः अनशनैरुपवासहननसमर्थैकयो गैः १४

वेदानुसारिणां

यानां श्रुतीनामविरोधसाधनेन साधुभावं प्रकटयंतीमखिलगुणाभिरामां रामानुजसरस्वतीमभिनंदामि ॥ प्रसिद्धं हि संधिमिच्छंति साधवइति
॥ पश्य ॥ निस्त्रैगुण्यगुणावधूननपरा नैर्गुण्यवादाः श्रुतौ मुख्यार्थाः सगुणोक्तयः शुभगुणप्रख्यापनाद्दूषणः ॥ अद्वैतं च तथा विशिष्टविषया
निष्कृष्टरूपाश्रयाभेदोक्तिस्तदिहाविलक्षणेति हि तं रामानुजीयं मतम् ॥ ५६ ॥ कृ० ॥ अवितथमेतद्यथापि यद्गमे संचरंत्याचार्यपुरुषसमा १
ख्याताः एतन्मताभिनिविष्टाः शिष्टास्तेषामेषा रीतिर्न रोचते विवेचकेभ्यः ॥ पश्य तावत् ॥ हत्वा मार्गे द्विजादीनखिलमपि धनं हृत्वा तिर्यक्
तान्दृष्ट्वास्तस्करायेवनगिरिनिलयायेचनीचाइहान्ये ॥ कृत्वा चक्राकमेषां झटिति विदधतः किंच मंत्रोप देशं तद्दत्तैरेव वित्तैर्दधति तनुममी
वशीपारंपरीभिः ॥ ५७ ॥ किंच ॥ जारान्चोरान् किरातान् जनपदद्रमनान्नाजपाशान्महाशाः शिष्यान्कृत्वाति दृप्ताः श्रुतिपथविधुराः श्रोत्रिये
भ्यो न निष्ठेः ॥ साकं नो भुंजते मी सकृदपि विनतिं कुर्वते येन तेषां संकेतेनैव सिद्धं तदिदमविदुषां श्लाघ्यमाचार्यपुंस्त्वं ॥ ५८ ॥ अहो महानयं
मभिजनविद्यावृत्तसंपन्नानामन्येषाम प्यनिवृत्तो व्यामोहः ॥ आचारस्य दवीयसां घनतृषामज्ञातवेदाध्वनां कामातंककलंकपंकिल हृदां के
षांचिदेषाममी ॥ मूढाचारजुषो जितेंद्रियतयाश्रेष्ठाः स्वयं सूरयः शिष्यत्वं यदुशंति तत्किलकलेः साम्राज्यमत्रोर्जितम् ॥ ५९ ॥ अपि च ॥ स्व
यंतरितुमक्षमः किमितरानसौ तारयेदिति स्वयमचिंतयन्नगणयन्धनानां व्ययम् ॥ जडं गुरुरिति भ्रमन् श्रयति पुस्तकाडंबरैर्बहूपकरणा
न्वितैः पृथुलदेवताविग्रहैः ॥ ६० ॥ अपि च ॥ अमलमतिषु लोके जाग्रत्स्वकेष्वनेकेष्वपि निजगुरुवंशोत्पत्तिमेवावलोक्य ॥ विगतशुभ चरित्रं
वेदशास्त्रानभिज्ञमपि गुरुरितीमं कष्टमाराधयंति ॥ ६१ ॥ अपरमपि कलेराकर्णय चमत्कारम् ॥ सम्यक् शिष्यजनं परीक्ष्य वटुभिः संव
त्सरैरुत्कं केशुश्रूषाभिरुपादिशन् प्रमुदिताः पूर्वे भुवीति श्रुतम् ॥ आराध्येष्टसमर्पणैरविनतानाचार्य एवादरादर्थैर्भूरितमैः प्रशस्य

१ अनित्यत्वात्स्वपापेभ्यः २ मत्ताः ३ चक्रमुद्राचिन्हं ४ दुर्नृपान् ५ रहिताः ६ क्रूराणां ७ अतिलोभिना ८ इच्छंति स्वीकुर्वंति वा ९ महतीभिर्देवताप्रतिमाभिः ॥ ॥ ॥

वि॰ द
१५

लभते शिष्यानक्रमेणाधुना ॥५३॥ वि॰ ॥ मंदमनीषमहतः पुरुषानेवंमादृशः ॥ भवजलनिधिमज्जन्मज्जनोज्जीवनार्थं जगति महति वंशोज्ज्ञातवं
तो महांतः ॥ प्रपन्नधनतुष्टाः पंचसंस्कारदानात्कतिन कतिन एते ज्ञानहीनान् पुनंति ॥५३॥ अपि च ॥ आचार्याः पुरुषा महन्नरकुले [illegible] आस
दास्यो [illegible] सुमृतिवारिधेः परममीनावातरिष्यन्यदि ॥ अत्रास्माच्युतदास्यवृत्तपदहाविज्ञातमंत्रोत्तमाः सर्वे तर्हि कलावतमतनवो हंतापति
प्यन्नधः ॥५४॥ तापर्हिभिः सपापा जनता पुनतां महात्मनामेषाम् ॥ दोषश्चैवैदेषसमो दुष्टात्पुनतोपि गांगपूरस्य ॥५५॥ इदं च बोद्धव्यम् ॥ स दूरः
प्रभवश्चरित्ररहितो [illegible] स एव उत्तमैः साध्वाचारयुतोपि दुष्कुलभवः सभ्येषु नाभ्यर्हितः ॥ शालिग्राममहाग्रामपटुमतिः सल्लक्षणायुक्तमेप्यात्
तेन तु लक्षणाढ्यमपि तच्चक्रोज्ज्वलं कृत्रिमम् ॥५६॥ सविनयमंजलिं बध्वा ॥ शिष्यार्पितेन शुश्रू विना द्रविणेन तुष्टाः शिष्टाः मुकुंदशरणा यति धर्म
निष्ठाः ॥ सत्संप्रदायनियताः प्रयताः सदा ये तेभ्यो न मांसिकरवैवरवैष्णवेभ्यः ॥५७॥ इति विमानमन्यतः प्रस्थापयन् अग्रतो दृष्ट्वा ॥ एषा केरविणी
विशल्यकरणी दोषाशुगार्त्तात्मनामेतद्रोधसि पार्थसारथिरितिख्यातः समिंधे हरिः ॥ यत्पादाब्जचुंबिनासकरपतेः कोटीरमारुत्मतस्तोमानां तु
लसीदलप्रकरतो नो वरमेरंजनः ॥५८॥ अत्र वसंतः संतश्चिरंतनोन्नयंतश्चिंतनाश्रांताः ॥ अनन्वं ते सचरितमानन्वतो विभांति शांतिधनाः ॥५९॥
वि॰ ॥ अस्तु तथापि परिकलितगुणप्रहाण [illegible] प्राये हे पजनननिबिडनगरविशेषसन्निकर्ष एवात्र महान्दोषः दुर्लभाः खलु हूणेभ्यः कुत्सिततरं
मालोके हूणाः करुणाहीनास्तृणवद्ब्राह्मणगेणं न गणयंति ॥ तेषां दोषाः पारेवाचां येनारचंति शौचमपि ॥६०॥ पुनः स निर्वेदं विधिमुद्दिश्य ॥ शो
चत्यागिषु हूणकादिषु धनं शिष्टेषु च क्लिष्टतां दुर्मेधस्सु धराधिपत्वमतुलं दस्युषु भिक्षाटनं ॥ लावण्यं लुलनासु दुष्कुलभवास्वग्र्यो सुनीरूपता
कष्टं सृष्टवता त्वया हत विधे किन्नाम लब्धं फलम् ॥६१॥ वि॰ ॥ पश्यत्वमेतेष्वपि गुणग्राहिताम् ॥ टी॰ १ तप्तमुद्रापुंड्रमंत्रनामनित्यविधिः २ विष्णुः ३ न
भवातरिष्यन्निति च्छेदः नतरेयुरित्यर्थः ४ तप्तमुद्राद्ग्धदेहाः ५ एतन्नाम्नीनदी ६ मुकुटनीलमणेः ७ उपनिषद्भागाः ८ निरंतरासक्ताः ९ शरीरत्यागपर्यंतं १० विस्तारयंत
११ कुलीनाः ॥

प्रसह्य न हरंत्यमी परधनौघमन्यापतो वदंति न मृषा वचो विरचयंति वस्त्वद्भुतं ॥ यथाविधिकृतागसां विद्धति स्वपं दंडनं गुणानुवगुणाकरेष्वपि
गृह्णाण हूणेष्वमून् ॥६२॥ इति विमानमितः प्रतीच्यां दिशि योजनपंचकमतिक्रामयन् पुरतो ददर्श सामोदम् ॥ इयं कौ वीका वी कोरि शिखरिणः का
पिनगरी गरीयस्यां यस्यां विहरणजुषां पश्यलदृशां ॥ मुखं दर्शं दर्शं रजनिकरमादर्शममलं स्वरूपं के पंकेरुहमपि न निंदंति रसिकाः ॥६३॥ किं
च ॥ स्मरमनोजनतास्थानं स्थाने सद्रूपसेवनीसेयम् ॥ स्फुरताभ्युदयविधात्री शुभंकांचीसाधुरंजयति चेतः ॥६४॥ नगरीमेनां दक्षिणेन करुणा
पूरीव भगवती वेगवती नाम प्रवहति पावनी शैवल्लिनी ॥ माधुर्याध्ययनोपसन्नमधुलिष्पंदानि मेदानिलव्यालोल चलचारुभूरुहशिखानिष्या
तिपुष्याधिकैः ॥ डिंडीरैः स्मितवंति पांति दुरितादेगा यगा यास्फुरद्भेगो देजितवाजिमेधमुखकुहूधासिपार्थासिनः ॥६५॥ इतश्च सखे च स्मर नि
स्थिप्यताम् ॥ यएष राजत्कटकः सदालिभिः समाश्रितः शोभनदानसंपदा ॥ स नित्यशुद्धं वरदं तमुद्वहन् यथार्थनामा गजभूभृदीक्ष्यते ॥६६॥ स
भक्तिप्रकर्षमंजलिं बध्वा ॥ हृपाचलमुपाश्रितं त्रिदशपादपस्वर्गवीत्रपाकरमुपास्महे दिगधिपावनेपावनम् ॥ कृपाशिशिरलोचन कृतभवव्यथा
मोचनं वर्णी स्मरभिलाधरं वरदनामधामस्थिरम् ॥६७॥ कृशानु मामन्त्र्य ॥ वरदं भो भज सततं शरदंभोरुहविलोचनं देवम् ॥ परदंभोपहतिकरं हेर
दंभोलिधरमुखमरवाशानुतम् ॥६८॥ पुनः सानुस्मरणरोमांचम् ॥ तापत्रयप्रशनादमृतं गृहीत्वेतामिव वेधहयमेधवपामुपासे ॥ अंभोधिजाधरस्फ
धारसवासितेन या चुंबिता वरदराजमुखांबुजेन ॥६९॥ पुनः सानंदम् ॥ भुवनवहन शीलासिंधुरागं भजंती नयद वरदमूर्त्तिः साधुवेगापगा च
॥ दमयितुमवतीर्णा धातृयज्ञे हिती या सफलयितुमिहाद्यासादराप्रादुरासीत् ॥७०॥ टी० १ कामपंपादि २ हस्तिगिरेः ३ स्फुरदीणां ४ दृष्ट्वा दृष्ट्वा ५ कामासक्ताः सुकुम
नौयेषां तेन च ६ सुंदर रूपं सेवनीयसद्रूपं च ७ देवसंघोरतिश्च ८ क्षेत्रभूषणं च ९ एतन्नामकानद्याः १० कदाचिद्ब्रह्मासरस्वतीमनादृत्य भुवमागत्या श्वमेधं प्रारब्धवान् तद्रोषवत्यात
पापन्नो विघ्नितइतिकथा भनेकाश्वमेधफलनिर्माणे विधातसदृशानि ११ वरदराजं १२ हस्तिहरिः १३ कल्पद्रुः कामधेनुश्च १४ ब्रह्माश्वमेधसंबंधिनी १५ वरदंभो इतिपदं १६ शिवं दूरादि १७ उर
कं जगच्च १८ समुद्रमीतिः हृपाचलम्

क्र॰॥ वयस्यत वेपंजयानभिज्ञे तस्मिन्नजयती त्यक्तिरयुक्ता॥ सवनसफलीकरणभणितिरपि नत्वातिकूल्यभाजिनोचिता॥ तथाहि॥ अजयज्ञो
द्भवे तस्मिन्कथं नामजयज्ञता॥ सवनाशानुकूलेका सवसाफल्यकारिता॥७१॥ किंच॥ सखेश्लेषभंग्यैवदोषमुद्भावयिताभवतात स्मिन्नखिल
हेयप्रत्यनीकत्वेना विष्कृता॥ युक्तंचैतत्॥ पद्मोल्लासविधायिनि सत्पथैर्दीप्तिकृति चक्रेभव्यकरे॥ भास्वति वरदेभवितानजातु दोषोनुषंगवा नापि
॥७२॥ समंतादवलोकयन्नंजलिबध्वा॥ सेवे नंतसरःश्रयेकरिगिरिं श्रीपुण्यकोट्यासमं ध्यायाम्युत्तरवेदिमत्रमहितं देवाधिराजंभजे॥ कल्या
णींकलयामिकंजनिलयांकल्याणकोटिस्थितामीडेराघवयादवादि मकिरीन्वंदेमुकुंदाश्रितान्॥७३॥ इतिमतीच्यादिशिकिंचिदंतरमति
क्रम्यसविस्मयानंदम्॥ अत्रहि॥ स्वावज्ञानसमून्मिषद्रुषिसरस्वत्याविरिंच्यध्वरप्रत्यूहाय नदीप्रवाहविधिना पर्यापतंत्यामहो॥ दूनेतु द्रुहि
णे गणेष्वमरूतांदीनेमखेविघ्नतः पातुं सेतुरुदेषसेतुरभवत्सर्वांदुकेतुःस्वयम्॥७४॥ किंच॥ परं वेगंसरस्वत्याद्रुहेगमपितत्पते॥ एषसेतुर्वि
धरणोन्यरूणद्धुगपत्प्रभुः॥७५॥ अपिच॥ आशामीशानबंधोश्चरणनखरुचांधारयास्मेरयंतीकुंभीडिंभस्यकाष्ठामपिमणिमुकुटन्यु
प्तमुक्तामयूखैः॥ पर्यंके शब्दविद्यापरिमलसरले पंकजस्पर्धिनेत्राचक्ति वेगापगायांस्वपतिसमुदितां कापिताप्रिंछवर्णा॥७६॥ समंत्याभि
के॥ प्राजापत्यमखांतरायतटिनीपाथोनिरोधोद्यतःप्रासःपावनहेमतामरसिनीपारंकृपारम्यधीः॥ सेमंकीमल्लमल्लिकासहचरःपुष्णा
तु कृष्णांबुदच्छायःसोयमवातरन्महतिपारंगैर्भुजंगेशयः॥७७॥ पुनरनुध्यायन्सानंदम्॥ शांतमखमणिस्तोमश्रामंशायनमहीध्रेश
शिसखमुखंराजीवाक्षंसमुन्नतनासिकं॥ महितचरणंधातुःपत्न्यामहस्तमसःपरंहृदिलगतुमेबिंबोष्ठंतेयथोक्तकृदाह्वयम्॥७८॥५

१ विधातृयज्ञोत्पन्नायक्सेजयानभिज्ञजन्मा २ यज्ञभागाशनंतन्नाशश्च ३ लक्ष्मीकमलंच ४ आकाशवेदमार्गौ ५ चक्रवाकहिताःपक्षेचकपुष्ककरे ६ सूर्यदीप्ति
मांश्च ७ रात्रिर्दूषणंच ८ संज्ञकंविमानं ९ एतत्संज्ञकंस्थानम् १० अगस्त्यः ११ शेषे १२ सरसी १३ तद्भार्या १४ श्रीरंगक्षेत्रे १५ यथोक्तकारीतिनाद्देशमसिद्धनाम॥

१

किंच॥ वेगवतीसेतुनयाप्रागवतीर्णादिदेवताविनुताम्॥ प्रागवतीपंदुरिताद्रागवतीकलशजलधिकन्यायाम्॥७९॥ कृशानुः॥ अहो कथमा
क्रु कविः सन्नपि भवानमुं देवमभिनंदति॥ तथाहि॥ अधः करोत्यादिमशाब्दिकोरगकलानिधिं धिक्कुरुते मुखेनयः॥ कृतांतरायस्यसरस्वतीज
वेस्तवेरु विस्तस्यकथं भवेत्कवेः॥८०॥ वि०॥ किमेभिः श्लेषैकावलंबनैर्दोषैरमुं देवमाश्रितेषु खल्वप्रत्यूहः सरस्वतीप्रवाहो विजयते॥ पश्य।
कल्पंते कामरामास्फुरद्धरस्तधागर्वसर्वस्वमोषोद्यत्कान्युक्तान्यमी पारसिकजनमुदे धातृयो पाहिएषाम्॥ स्मयावेलास्फुदोलायितांजन
कल्पंते कामरामास्फुरद्धरस्तधागर्वसर्वस्वमोषोद्यत्कान्युक्तान्यमी पारसिकजनमुदे धातृयो पाहिएषाम्॥ कंपावेलास्कृदोलायितालिज
मुकुटाकल्पकल्पद्रुसूनोड्डीनालिध्वाननानाकलनपरिमलचारुवीणाभिगाना॥८१॥ किंचिदुत्तरतो दृष्टिमाधाय सांजलिबंधम्॥ सेमारंभ
निदानमापुर्वसुषां हेमाभिरामांबुजस्तोमायातमरंदलंभितपयोभूमास्वभूमानिता॥ सह्याद्रिप्रभवा समानविभवामत्यामस्त्यार्तिहृत्पुण्या योगिव
निद्रानमापुर्वसुषां हेमाभिरामांबुजस्तोमापातमरंदलंभितपयोभूमास्वभूमानिता॥ विश्वाह्लादकरीं करींद्रसरसीकल्हारपारंपरीभव्यामोदधु
रंधरानिलजडैर्दिव्यालयैजाग्रतीम्॥ कष्टापहिं निवर्त्तिनीं घनतपःक्लिष्टात्मनां योगिनामिष्टामिष्टभुजां भजामि विबुधैराराधितां देवताम्॥
॥८३॥ अथ प्रतीच्यां दिशि किंचिदंतरं गत्वा विमानमागमय्य सहर्षम्॥ त्रिदशाकलितस्नेहस्फूर्त्तिमान्तमपस्तमः॥ भाति दीपप्रकाशो
त्रशरणोगतबोधरुत्॥८४॥ कृ०॥ दीपप्रकाशसंज्ञा देवेऽस्मिन्नुत्तमस्फुरणे॥ रात्रिचरप्रतिकूले नदीपजातोऽनुसद्वचोनार्हो॥८५॥ नि०
॥मदमत्तमेवभाणी॥ प्रकटितदशावतारे प्रचुरां ज्याकलनभावितस्फुरणे॥ दीपप्रकाशनामसममं विभावर्युदिति भीतिहरे॥८६॥ निरू
प्य सानंदम्॥ श्रीरंगेश्वरशासनादधिगतश्रेयं चलाचार्यकं दांतं यं कविवादिदंतिहरिरित्यार्यावदंतिस्तितौ॥ सर्वस्यामपिहंततं प्रसर

१ कृ० दुग्धम् २ देवाः वर्त्तयश्च ३ तैलंप्रीतिश्च ४ तिमिरं अज्ञानंच ५ देवतादीपप्रकाशश्च ६ गृहरक्षणंच ७ उत्कृष्टतमे स्फुरणंयस्मिन्पक्षेउद्गततमः स्फुरणंयस्मि
न् ८ नदीपः समुद्रः तस्माज्जाता लक्ष्मीकौस्तुभोवा ९ दशावताराः प्रसिद्धाः पक्षेदशानां वर्त्तिकानामवताराः १० प्रचुरं यदाज्यं पक्षेप्रचुराः आजयः संग्रामाः ११ दांत
यांचे

णोस्वान्तं त्र्यमासेदुषां स्त्रामा स्फहि वेंकटेश कविराडत्राविरासीत्प्रभुः ॥ ८७ ॥ जनानुद्दिश्य ॥ भेदाभेदाविषयवादापतद्रूपपादार्थसाधकमदो
त्सादावहाद्भुतमखादागापर्यास्पदविनोदापहारभणितिः ॥ पादारविंदनतखेदापहारचतुरो द्वामारमाधवगुणास्वादोऽभितुष्टहृदयोऽपाप्नुवोभ
वतु वेदांतदेशिकमणिः ॥ ८८ ॥ अपि च ॥ नानाम्नायपरिश्रमं कलयतां नास्त्येव शास्त्रेषु धीः सत्त्वेऽप्यभ्युभयोस्तु योऽनेन स लभासाहित्यतो साहिती
॥ अभ्येता स्फुरसती षुनास्ति विनयो नाचारभक्तिः समा चातुर्यः सच सा च सा च स च ताश्चालं व्यस्त्वेलस्यमुम् ॥ ८९ ॥ किं बहुना ॥ अवंतिमासेयतमुषा
स्पदेवं गर्वं मौकुदृशां प्रशांतम् ॥ कुर्वंतमेनं गुरुमंतरेण गुर्वंतरं कोऽत्र गुणी वृणीते ॥ ९० ॥ कृ॰ ॥ वयस्य मा स्मैवमवोचः यदेतस्य बलवन
तः पस्यात्स्वीकार एव वरमिति मे प्रतिभाति ॥ तथा हि ॥ यस्मिन्यस्तेऽस्ति मोक्षो गुरुणि लघुनि वा साधने प्रयुक्ते श्लाघाहेतुश्रमार्थव्ययकर
यतनाद्यव्यकर्मप्रहाणम् ॥ तं हंतोपेक्ष्य पश्य प्रतिजगति कृः काम्यवेदोक्तकर्मानुष्ठानावश्यकत्वप्रकटनकठिनं वेदचूडार्थमार्गम् ॥ ९१ ॥
वि॰ ॥ निरूपणनिपुणोऽपि भवान् कथमेवं कथयति ॥ वेदांतार्थविशोधितं हितपथं त्याधूय साधूचितं चापल्याद्नुरुंधते तदितरं पश्यान मंधान
राः ॥ हृद्यं भक्ष्यमकांतपाचविहरेत्स्वं प्रियालापिनं रोगार्ताश्च पलास्तवति न तु तयः पथ्यवादी भिषक् ॥ ९२ ॥ किंच ॥ आम्नायमौलिगुरुणा क
रुणाकरेण नावातरिष्यत यदीह भवाब्धिनावा ॥ अज्ञातभक्तिजगदश्रुतसच्चरित्रमज्ञातशास्त्रमभविष्यदवेदिकं च ॥ ९३ ॥ पुनरालोच्य ॥
अथास्य खलु निगममौलिगुरोरशेषविद्यासमुद्रतलस्पर्शित्वादधुनातनविबुधव्यूहसमभिव्याहारो नोचितः ॥ किंतु ॥ निशमयति यः किल
दृशानिशाममयत्यंभिणावयोविभ्रम ॥ ॥ गजतुरगौकन्नेयौ तैः सह वेदांतदेशिकोऽगण्यः ॥ ९४ ॥ विचिंत्य ॥ गंभीरशब्देन विशालमोहदशापि
शावग्रहमोचनेन ॥ घंटाहरेर्वेंकटनाथरूपा कल्याणमुल्लासयति क्रनीनाम् ॥ ९५ ॥ पुनः सचमत्कारं ॥ वेदांताचार्यशब्दोऽस्मिन्वेदांतस्था

टि॰ १वेग २शास्त्रधियोः ३साहित्यशास्त्रम् ४चातुरीशब्दस्य बहुवचनम् ५हयग्रीव ६अज्ञानजम् ७ शेषः ८ आलोचयति ९ घंटावतारो वेंकटाचार्यः ॥ ॥

पकेस्समः॥ इमंविवेकं कुर्वतोदांताचार्यंचतंविदुः॥९६॥क॰॥ कथंनामद्रुहिणगृहिणीचिकुरनिकुरंबचुंबिचंपककुसुमसुकुमारतराः॥ क
विकथककठोरवगुरीरपिगिरोदुस्तरभस्तरनिष्ठुरबृंहिषुसासूयहृदयनिर्भेदायजायंते॥ वि॰॥ सखेशृणुतावत्॥ वेदांतार्य गिरः प्रसूनमृद
वोमोदंदधानाः सतांप्रौढग्रावककठोरकाण्यपिपरंभिंदंतिहृदिद्विषाम्॥ नंद्याचार्यजनाभिनंदितमृदुस्पर्शोपिपादोहरेर्दुर्भेदेशकटासुरेतु-
शतकोट्योक्रमागान्नकिम्॥९७॥पुनःसप्रार्थनमंजलिंबध्वा॥दर्पाविष्टकुदृष्टिदुष्टसमयोत्सादायबोधांकुरोद्भेदायप्रबलेकलावपिजयोत्था॰
दायवेधाध्वनः॥श्रीमल्लक्ष्मणयक्ष्वरक्षकबुधामोदायपापाटवीच्छेदायाथिमरुत्तरुर्विजयतांवेदांतविद्यागुरुः॥९८॥ इत्य[illegible]न्यतोदृष्टिं वि
न्यस्यसांजलिबंधम्॥श्रीमान्गभीरतरवेगवतीप्रतीरभूमावघद्रुहिस्फुरद्गुरिवावतीर्णः॥ कामादिवैरिगणमुल्बणमस्मदीयंकामासिकान
रहरिः कवलीकरोतु॥९९॥ इत्यन्यतश्चक्षुर्निक्षिप्यप्रांजलिःसन्॥ भयार्त्तजीवातुदयामहिम्नेवैकुंठधाम्ने करवैनमांसि॥आम्नायउ
क्तः परमेशितेतिनाम्नोयउक्तःपरमत्रचित्रम्॥१००॥युक्तंचैतत्॥यतोविष्णुःपरमइतिश्रुतास्श्रुतिः॥अनपायपरमोविष्णुःकस्मात्परमोभवे
त्॥युक्तंरमापतेरन्येदेवास्त्ववरमाइति॥१॥किंच॥जाग्रत्स्वेवशिरासिनिस्सवचसांसर्वान्नतौशार्ङ्गिणस्तत्रव्यासपराशरादिकृतयोदत्तास्स
वस्त्कृतः॥ यःपादांबुददातियस्तदुपसंगृह्णातिधत्तेथवायश्चैतच्छिरसैवतंषुपरमंजानातिकोनात्मवान्॥२॥पुनःसचमत्कारं॥दुर्वादिनो
विष्णुपदारविंदद्रोषापहृतानुसरंतिमोहात्॥तेषांमतंतुस्वयमत्रविष्णुपदारविंदानुसृतिंविधत्ते॥३॥ इत्यन्यतोदृष्टिंविन्यस्य॥ ससमंतरूढ
द्रुमपुष्पनिष्पतन्मरंदसंतत्यभिषिक्तमुत्तमम्॥रविक्रमाधकृत्वनिरोधिगोपुरंत्रिविक्रमस्यायतनंनिशाम्यताम्॥४॥ सविस्मयमभिध्यायन्

र्त्तिं॰१विचारंकिंचश्लेषेणइमंवेदांताचार्यशब्दंविगतवेकंवेशब्दरहितंकुर्वतोलोकास्तमाचार्यशब्दंवदांताचार्यंब्रुवतेतियुक्तमेवेति श्रीमद्दंतोपाह्वयलक्ष्मणा-
नालापत्तकौशल्यम्॥२ वज्रप्रायाताम् ३ कामासिकानामकनगरवासीनरहरिः ४ नआम्नायउक्त इतिविरोधाभासंवैचित्र्यं ५ अनुत्सृष्टःलक्ष्मीरहितश्च ६ गमन रहितं

अव्याराध्यपतामनश्वरपदप्रासादनिश्रेणिकोहर्षादूर्ध्वमुदंचितः सचरणस्त्रैविक्रमोनः कुमात्॥ त्रैलोक्यार्पणतःसितंशुभ्रयशश्छत्रंयदासीद्‌ लेर्द्राघिष्ठोहरिनीलदंडइवयस्तद्धारणायोद्धृतः॥५॥ कु॰॥ किमरे मायाविनमेनमक्रमं त्रिविक्रममभिनंदसि॥ पश्य॥ श्रीमानपिस्वयंदैत्यात्कुर्वाणःकुप्रतिग्रहम्॥ विदन्नसमहतींवृद्धिमिष्टगोत्रैभिदेददौ॥६॥ वि॰ शिष्यायमकपटानांकवीनांनश्लाघनीयः॥ यतः॥ निस्यानपायिप्रमदोपि नाथोबहुभवन्नवंचितदातृकोसौ॥ कविव्यथाकृत्खलुभूस्करोपिभूदानवत्त्वंसममेवभेजे॥७॥ वि॰॥ अभ्युपगच्छामएवभवतःप्रौढगुणदोषीकरणपांडित्यमास्तामेषश्लेषचमत्कारः॥ आकर्णयतावदेतत्॥ यदाश्रितरक्षणायप्रबद्धोक्षणः स्वमहत्त्वाननुरूपमपिरूपमापेदे॥ निस्यान्नतोपिनिरपायपरमाश्रितोपिदातापिहंतबहुशोमहतांपदानाम्॥ स्वीकृत्यवामनवपुःश्रितवामिंद्रमीशःपातुयदत्रितयमत्रबलिंबिभित्से॥८॥ पुनसभक्तिप्रकर्षम्॥ त्रैविक्रमास्त्रिपथगाजनकःसपादःपायात्सुरस्यमरुतांमरुतांनिहंता॥ शंभोःस्फुरन्मुकुटभूषणदानचंचुमंभोनिधेःश्वशुरमासगिरोयमाहुः॥९॥ इतिकिंचित्परिक्रम्य॥ अत्रहि॥ कांचीनगरविभूषाकामाक्षीकल्पमंजरीभजताम्॥ रक्षास्करसेनानांराजतिशर्वस्यसर्वस्वम्॥१०॥ इतिनिरूप्यसविस्मयानंदं कामाक्षीमामंत्र्य॥ दंतश्रीस्तवदृश्यतेयदिततःकुंदंननिंदंतिकेवक्त्रंयद्यभिलष्यतेबुधजनश्चंद्रंनसंद्रक्ष्यति॥ दृष्टेदृष्टियुगेपुनर्नेविनुयाद्वालोपिनीलोत्पलंसूक्तिश्चेदनुभूयतेमधुरताकामाक्षिकामाक्षिके॥११॥ कु॰॥ यद्यपिविद्यतेकामाक्ष्यासर्वाभिनंदनीयसौंदर्यम्॥ तथापिमुधातदितिप्रतिभाति॥ तथाहि॥ कावोविरूपाक्षइतिप्रतीतःकामस्यहंतागिरिराजपुत्र्याः॥ स्तंबेरमास्यस्तनयो पितस्यालंबोदरःकिंफलमाभिरूप्यम्॥१२॥ अनयोःखल्वंबिकात्र्यंबकयोःदांपत्यमननुरूपमितिव्यक्तमेतत्॥ इयंहिसर्वमंगलासतुस्मशानमंदिरोविभातिहैमवत्यसौसयातिदिक्षुभिक्षुकः॥ इयंतुकुंकुमांकितासभस्मराशिरूषितोयरालकुंतलाचसाजटाभिरेषभीषणः

१लक्ष्मीसपत्नौ २कुत्सितपृथिव्यौ ३इंद्रकुलनाशकौ ४भूदैत्यत्वंतत्स्वीकारकर्तृत्वंच ५स्वभक्त ६निर्जलत्वं ७शिवःश्लेषतुविरूपेकुत्सिते भक्षीणीति ८मंगलविरुद्धंचैतत् ९सुवर्णाङ्गे कृताहिमनगस्यकन्या॥

वि॰ वयस्यमेवंवादी॥ नखल्वप्रशस्तैररण्यावासवासः प्रभृतिभिः सांसिद्धिकमभिरूपाणामाभिरूप्यमपहीयते॥ विनस्तांवाकृत्तिंनिवसतु चिरंवापितृवनेशिवस्तावद्गुणा महिम्नामथान्येषसुभगः॥ परीतंशैवालैरुषितमपिपंकेषुमलिनानलीनोविभ्राणंकिमिहकमनीयं नकमलम्॥१४॥ किंच॥ रमणीयः सहिपुरुषोरमणी यत्रैवरज्यतिविदग्धा॥ श्लोकः सएवसुभगोश्रवनसक्तेहियत्ररसिकस्य॥१५॥ अवधार्यतामतिमात्रमत्रैदंविचित्रम्॥ शिवास्यालोकितः कामोजितइत्येवशुश्रुम॥ न्यस्तासीत्रजितोयस्मात्कामास्यालोकतः शिवः॥१६॥ पुष्कलंकिलपुत्रभाग्यमपिपर्वतराजकन्यायाः॥ यतः॥ कुशलीभनाथवक्त्रः पुत्रः प्रथमोहिमाद्रितनयायाः॥ पंचास्यात्पितुरधिकः षडाननोनंदनोहितीयोस्याः॥१७॥ इतस्त्वन्यतः किंचित्परिक्रामन्सामोदम्॥ शशांकमौलिः सहकारमूलेकैलासवासीसइहाविरासीत्॥ यस्याग्निभूर्हेकपतनूभवश्चयोषापिभूषापिचनागराजिः॥१८॥ रु॰॥ वयस्यकिंवर्णयसिविश्वविलक्षणचरित्रंरुद्रंलोकेहिलोचनशैलस्यसपिपादपिषयायतमानान्॥ जनानेवपश्यामः॥ अयंतुपशुपतिस्थाणुरितिस्वाह्वयमन्वर्थयन्निवआशुशुक्षणिमक्ष्णिनिक्षिप्तवान्॥ वि॰॥ अवधेहितावदभिधास्यामिरहस्यम्॥ अंगानुषंगोदितसीतबाधामितोद्युसिंधोश्चसमन्वयेन॥ दग्धुंवहत्यग्निमपीतृतीयादरोहसंतीमिवहंतदृष्टिम्॥१९॥ रु॰॥ हेततर्हितुहिनकिरणशकलास्फुरसरिज्झरीशिशिरशिरसस्त्रिपुरहरस्यकथमभिषेकप्रियता॥ ततश्च॥ गंगातरंगावलिभिःसुधांशोः सुधाझरैश्चानिशमार्द्रमूर्ध्नः॥ वृथाभिषेकंकलयंतिशंभोस्तृप्तायतोयस्यदलपःके॥२०॥ वि॰॥ अत्रापियुक्तमुत्तरंन्यादयामि॥ ज्वलनाकलनादिषस्यपानाद्विषभाजांवहनाच्चुतप्तमूर्तेः॥ अनिशंत्रिदशापगाधरस्याप्यभिषेकप्रियताशिवस्यजाता॥२१॥ रु॰॥ भस्तीदमथाप्यन्यदपिनयुज्यते॥ किमसौविहायविहायसे ततंशंकरशिरसिगंगातरंगांतःप्रतिवसतिमृगांकः कृशांगः॥ टी॰ १भनोलानंभनयानं२पार्वतीकामाभिकामेनेत्रंतेनजितइतिविरोधः४एकाम्रेश्वरनामाशिवः आम्रेश्वरइतितद्देशप्रसिद्धः५गुहः अग्न्युत्पत्तिस्थानंच६नगराजस्येयंनागराजिःनागानांपंक्तिरितिच७अंगारपात्रम्॥

वे-द
१९

विश्व०॥ शृणु सखे तत्र कारणम्॥ शिवं शिरसि सीतभानुः सागरसूनुत्व सूचनाय परम्॥ अधिवसति मन्महिष्या गंगा या जठरमूर्ल्पतनुरेषः॥२२॥
कृ०॥ तथापि लुब्ध एष फलप्रेप्सुभिर्नादृत्यः॥ तथाहि॥ सूक्ष्मसितांशुकला भेप्यपटो हैमधरपदनिविष्टोपि॥ लुब्धोयमयो हस्तस्तंडुलेसत्वेप्य
टत्यहो भिक्षाम्॥२३॥ अन्यदल्पमिदमुच्यते॥ यच्छंकरसंगाद्गंगायामपि जीवनदायिन्यां सक्रांतातद्गतालुब्धता॥ पृष्ट्य॥ मुक्ताश्रिता वि
ष्णुपदादुदीर्णा गांगेयमुत्पाद्य वसुप्रकृष्टम्॥ आप्यापि रत्नाकरनित्यसंगं कपर्दिकाशां न जहाति गंगा॥२४॥ अन्यच्च॥ सर्वतोमुखसमृद्धिजु
षोद्यत्पौंडरीकं घनवासनयापि॥ यत्तयाव्यवधिजन्तुमरवस्तत्तत्र घाति विरसं गतिदोषात्॥२५॥ पुनर्विमृश्य॥ ईशः करस्थीकृतकांचनाद्रिः
कुबेरमित्रं रजताचलस्थः॥ तथापि भिक्षाटनमस्य जातं विधौ शिरस्थे कुटिले कुतः श्रीः॥२६॥ किंचैष विरूद्धधर्माक्रांतिवासानस्तोतव्यः॥ शृ
णु तावत्॥ धत्ते महो मूर्ध्नि तदोषधीशमोषर्बुधं भालतलेंगकेषु॥ फणींद्रमौलिस्थमणिप्रसूते हरोंधकारित्वमथाप्युपैति॥२७॥ अपि च॥ तार
कारिं वहन्नंके मस्तके तारकाधिपम्॥ अंगीकुर्वन्नुमुद्दृशामप्यलीकासौ विभात्ययं॥२८॥ वि०॥ किमेभिः शब्दश्लेषैकशरणैर्दूषणैरस्य खलु म
त्कं जयस्य विश्वस्तुत्यमसदृशं वदान्यत्वम्॥ दीर्घायुर्मुनिसूनवे प्रददे दिव्यं तथाभीष्टं प्रख्याताय भगीरथाय भगवत्पादामृतं प्रादुदात्॥
पापेभ्योपि च बाणपंक्तिवदनप्रेष्ठेभ्य इष्टफलप्रादात्तस्य शिवस्य भाति जगदाल्हादाय वादान्यकम्॥२९॥ कृ०॥ तदेतद्व्याहतभाषितं॥ यन्म
हादेवस्य वादान्यकं जगदाल्हादायेति॥ यतः॥ दत्वा वरान्दानवराक्षसेभ्यो विश्वस्य च स्वस्य च यो विषादम्॥ संपादयामास शशांकमौलि
दातृत्वमेतस्य तवैव हृद्यम्॥३०॥ वि० कुटिलधिषणगुणमपि दोष इति घोषयति भवान्॥ तथाहि॥ टी० १ एककलः २ चंद्रः वस्त्रं च ३ विरोधे हेमध
रस्येदं हैमधरं पक्षे हिमधरस्येदं ४ मुभं लोहं च ५ तंडुर्गणस्तेन लसतीति तस्य भावस्तत्त्वम् ६ मौक्तिकानि मुक्ताश्च ७ भीष्मः स्कपर्णं च ८ द्रव्यं वसवश्च ९ सर्वतः प्र
सारि समृद्धिजुष पक्षे सर्वतोमुखमुदकं १० पुंडरीकं कमलं तत्संबंधि सुगंधि मुक्तया पक्षे पुंडरीको यतः ११ दैवं चंद्रश्च १२ स्कंदं १३ त्रिपंदृष्टिं चा १४ कुत्सितं भालं च १५ अ
ग्रेसरः १६ औदार्यम्॥ ॥

दैत्येभ्योन वरान्सदास्यतिपदि त्र्यक्षो मुहुस्तर्हि तेनाशुस्यन्भुवनस्य पेष्टुमुद्यंनाप्य यदृयांशार्ङ्गिणः॥ नोदापिष्यत मानुषादिषु हरिर्नो सेतु
गीतादिकं प्रारप्स्यद्भ गवान्भवार्णवममीनालंघयिष्यन्नराः॥३१॥ किंच॥ पंपातरंगशिशिरानिलडिंभजातकंपाम्रनिघ्यति तपुष्परसाभिषि
क्तः॥ संपादयत्यतुलसंपदमर्थिनोनुकंपासभ्रो बुधिरयपतिरंबिकाया:॥३२॥ पुनर्निरीक्ष्यसश्लाघम्॥ अल्पोपिकांच्यामावासादासादय
तिगौरवम्॥ यतएतत्पुरस्थाणुर्गिरीशइतिगीयते॥३३॥ कृ०॥ अन्योन्यविरुद्धस्वभावाभ्यां देवाभ्यामाक्रांतां नगरींकिं विनौषि॥ देवौह्यव
धिकौविपश्यलसत्तः प्राचीप्रतीच्याशयोस्तत्रैकः कुरुते विनौपकमधश्चित्रं पुरश्चापरः॥ एको नित्यमनष्टमूर्त्तिरितरः ख्यातोष्टमूर्त्तिर्जगत्ये
को वारितवान्गजार्त्तिमपरा हन्नेगजार्त्तिंपरः॥३४॥ यद्वा॥ कांचीनाम्निपुरेस्फुरेंद्रमहितेप्राकृपश्चिमोद्देशयोश्चित्रं दैवतयोश्चिरंनिवसतो
रीतिर्विरुद्धामिथः॥ एकोहिद्विजराजमप्यधरयत्यन्यस्तुमुत्तंसयत्यंघ्रोहंतबिभर्त्तिकश्चिदपरः स्वेमूर्धनिस्वर्धुनीं॥३५॥ विरुद्धदेवाक्रांत
कांचीनगरसमागमाद्धारणधराधरोप्येवम्॥ तथाहि॥ भेत्तास्ति गोत्राचहरिर्महासवज्रुषोहिरण्यगर्भस्य॥ भयहृदिभास्याभयकृन्मूलाच
लयोश्चका स्तिहिहि :३६॥ अयंचापरोदोषः॥ दशानुषंगं च गदौन्नृपंचत्यक्तुजनायेनिवसतिकांच्याम्॥ दंतावलाद्रीश्वरमाश्रितास्तेदेहस्यये
तौनियतंभजंते॥३७॥ वि०॥ सर्वमेवंसंभाषिष्ठाः॥ यतएकरूपदैवतमिदंनगरमितिसमर्थ्यते॥ शृणुतावत्॥ फणिपतिसरः स्फुरतीभेना
यकधरोत्तमांगशोभितनुः॥ भवहरिसंज्ञाकांच्योः पूर्वापरयोर्हिदैवताजयति॥३८॥ अन्यच्चास्यनगरस्यभूषणमेवनतुदूषणमित्यन्यत्र
दृष्टिमाधायसानंदम्॥ अहोखलु॥ ममाद्यपचेलिमभागधेयम्॥ स्फुरयोवत्तोपगीतः प्रातःपद्मानननोमुनिध्यातः॥ व्यासेकृतोयःख्या
तः पांडवदूतःसदृक्पथंनीतः॥३९॥ कृ०॥ अनुचितकर्मासो किमर्थमनुवर्ण्यते॥ टी०१एकाम्रेश्वरसमीपवर्तिसरः २पुरस्थोःणुःपुरःसंबंधिस्थाणुरितिच
शिवश्च३ गरुडःगणेशश्च४ गजेंद्रार्त्ति५असुरः६ गरुडचंद्रौ७ भयंशंखश्च ८रोगायुधयोः९ अनंतसरःपक्षेसर्पराजहारः१० आदौ भनायकश्चेंद्रःपक्षेदुभनायकोहस्ति
गिरिः११ अग्रोत्तमा

सकलजगतामीशानोपि स्वयं विगतश्रियामिदमनु विवेदं तो जातोयमेष पृथाभुवाम्॥ किमिह महतां दृष्ठा खद्योतपोतनिकेतने क्षिममधिप
तेर्भासोदासानुदासतया स्थितिः॥५०॥ वि०॥ पुरोभागिन् भगवद्गुणेषु दोषमनीषया भवानेव दुष्यति॥ श्रूयतामेतत्॥ कवित्वस्य गांभीर्य मौ
दार्यमृद्धेः प्रभुत्वस्य शौर्यं गुरुत्वस्य विद्याम्॥ महावंश्यतायाः सदाचारपूर्तिं महत्त्वस्य सौलभ्यमाकल्पमाहुः॥५१॥ इत्यपरत्र विमानमानय
न्सानंदम्॥ अत्र हि॥ विकचरुचिरपुंडरीकखंडद्युतिमदमोचनलोचनप्रभावः॥ जयति विजयराघवः सदैव श्रुवितरगृध्रसरोवरोपकंठे॥५२॥
किंच॥ संपातिसोदरसरस्तटसंप्ररूढो भात्यङ्कतो विजयराघवपारिजातः॥ शाखातते रूपरिसङ्गिरुदीक्ष्यते यो यस्याध एव सकलः फ
मनःप्रपंचः॥५३॥ पुनः सभक्तिप्रकर्षम्॥ जनानुद्दिश्य॥ भोभो भुक्तिमुक्तिप्रेप्सवः द्वंद्वं शृण्वंतु भवंतः॥ विश्रुतात्मितवात्सल्यं वीरं विजय
राघवम्॥ नमस्कुरुत यो गृध्रं समस्कुरुत दाहतः॥५४॥ अत्र च गृध्रपतिक्षेत्रे विश्वप्रसिद्धा काचिद्दिव्यैचित्री॥ तन यार्थनयास मागताभि
स्तरुणीभिः परिभर्जिताश्च मुद्गाः॥ दृढमंकुरमत्र देवशक्त्या समासा पुलकांकुरैः फलंति॥५५॥ कृ०॥ किनमहिमाननुरूपस्थितिरसौ
विजयराघवः किमीड्यते॥ क्रकस्कृतो हंसमयूरबाहुमुखप्रगीतो गरुडासनो सौ॥ क्षीराब्धितीरावसथोपि वासं करोत्यहो गृध्रसरोति
केस्मिन्॥५६॥ वि०॥ तदेतद्यापयोधेरेतस्य भूषणमेव न तु दूषणम्॥ तत्तादृगुत्तमपदे तमसः परस्तादस्तामयैस्तु लसूरिभिरर्चितोपि
॥अभ्याविरस्ति हि हरिः स्वनिरान्तरामाणां दृष्टिकृतार्थयितुमेव दृढानुकंपः॥५७॥ इति दक्षिणतो विमानं प्रस्थापयन् सहर्षम्॥ इयं हि॥ गंगासिं
धुसरस्वतीभवहरा तुंगा सुतेगात्मजा रंगाभ्याशतरंगिणी वदघत स्वगारभंगावहा॥ शुम्भाराधामनोमनीषिजननतारब्धावगाहा मुहुर्मुग्धा
नामपि शुद्धबुद्धिजननी दुग्धापगा दृश्यते॥५८॥ किंच॥ ॥टि०१एतन्नामा देवः २ वेदः शिफाच ३ देवपुष्पयोः ४ दाहसंस्कारमकरोत् ५ शुकाचार्यः
पक्षीच ६ परमहंसाः ७ षडाननः मयूरोवाहनश्चेति पृथगपि श्लेषे ८ छंदोमयासनत्वं सूचितम् ९ कांचननदी १० कावेरी ११ पालरू इति तद्देशप्रसिद्धा॥ ॥

ममदुग्धनदीधनदीकृतमज्जन्मानवानवांभोभिः॥ बुधजातनुतातनुतांतनुतापरुहनाघानाम्॥४९॥ कु० भवत्वेवमथाप्यस्याः क्षीरतरं
गिण्याविधिनाकृताविरसता॥ कालुष्यलेशविधुरामधुरापि पयानदी॥ रोचितसाधवयुक्तानोचेल्लवणसिंधुना॥५०॥ वि०॥ गुणमपि भणासि
दोषतया॥ यतः॥ कवनसमागतसिंधुनिधुनीजलसाधुनिस्नानम्॥ पंकविलोपंकलयतिसंघटयतिनिश्रियमिति स्मरंतिबुधाः॥५१॥ किंच
विहस्थिणतोभिक्रम्य॥ मोहादिदोषरहितांनटवासिदेहिव्यूहायकामपिमतिंमहतींदिशंती॥ स्वाहाकरोतिदुरितानिशुभप्रवाहावाहानदीबु
धसमूहकृतावगाहा॥५२॥ अस्याश्चोत्तरतीरे श्रोत्रियोत्तंसवाससयोग्यः॥ समग्रगुणोसावग्रहारः संलक्ष्यते॥ पश्य॥ कर्णानंदकेस्फु
रन्मधुकरव्याहारवाहापगारोधःश्रास्विमरंदवुंदिलपयःकल्याणकुल्यावृतः॥ आत्रेयान्वयविहृदध्वरदत्रिर्गंधानुबंधापतत्सेमोभात्यरंश्री
निफालदृतिहिग्रामाभिरामाभिधः॥५३॥ किंच॥ साध्वग्रेसरभूपेतःसाकेतनगरश्रियम्॥ अग्रहारोविभात्येषरघुनाथाभिरक्षितः॥५४॥ किंचिहि=
मानमुन्नमय्यसम्लाघम्॥ नद्योःपार्श्वेहूयमवलोक्य॥ चारुगुणैःसन्मणिभिर्जुष्टावाहानदीपयस्विन्योः॥ उपकूलमग्रहाराउदग्रहाराद्द्वावने
भाति॥५५॥ कु०॥ अमून्ग्रामान्कथंकारमग्रहाभान्प्रचक्षते॥ स्कवृत्तमुक्ताराहितापदेनानाश्रिताजनाः॥५६॥ वि० भवतास्त्वतिरेवस्पांभं
म्यंतरेणकृतौतमृष्याहृष्यामिचअयसर्वतस्तुंडीरमंडलमवलोकयन्॥ सहर्षातिरेकवयस्यस्फुटमस्यतुंडीरमंडलस्यपश्यतुभवान्पावनत्वं
रमणीयत्वंच॥ तीरेतीरेस्फुरतिसरितामग्रहारोत्रभूयान्गंग्योवर्गोधरणिमरुतामग्रहारेग्रहारे॥ वर्गेवर्गेधरणिमरुतांवर्त्ततेसाधुयज्ञोयु
ज्ञेयज्ञेप्यवणासभगस्तोत्रशास्त्रानुघोषः॥५७॥ किंच॥ तुंडीरमंडलनिवासिषुदुग्धसिंधुडिंडीरखंडनिभकीर्त्तिषुपंडितेषु॥ आप्याय्ये

ति० १ देवर्षसत्कृता २ रवपतु ३ कार्यम् ४ लवणयोगेपयसोनिषिद्धत्वादनादेयत्वमस्याः ५ विधादयः सूत्रंच ६ उन्नमस्त्रकृविमार्ष्टिवाग्रामश्च ७ अग्रेसराः श्रेष्ठा
यपूपाः तैःस्रतःप्रसेअग्रेसरभूपेतः ८ रामभद्रोरघुनाथदीक्षितश्च ९ उन्मरत्लोनिसाधवश्च १० श्रेष्ठाः ११ ब्राह्मणाः १२ फेनः १३ सेव्यमानम्॥ ॥ ॥

मनमतिविलैरविगीतमेवह्येवेत धूतदुरितंचमितंनकस्मै॥ ५८॥ कृ॰॥ हंतवस्मिन्नंतिमयुगेपिअध्वरकर्माचरतामभीषांचरितानिकथमिवरो
चेरन्कोविदेभ्यः॥ नकलिवसंपत्तिर्नचकुशलता यष्टुरनघा नचद्रव्यंसुद्धंनचहृदयशुद्धिः कलियुगे॥ प्रसिद्धिंकांक्षंतः परिमितधनंहृतकृपण
वृथायपन्योऽभविदधति तथापिक्षितिसुराः॥ ५९॥ किंच॥ शौचंनाचरितंयथाविधिकलौशक्ताद्विजाः किंचतेयेखल्वाचमनापूर्वादिनियमास्ता
न्समतुंमपाक्षमाः॥ कामीषांपुनरग्निहोत्रनियमः केष्टेरनुष्ठानधीः काग्निष्टोममुखामखाः सपशुकाः क्वत्याग्निचित्यातु सा॥ ६०॥ वि॰॥ स्थूल
मनीषमृषाकिमितिभाषसे॥ यतः॥ शिष्टेभ्यः प्रतिगृह्यवित्तमुचितंसंपाद्यविद्याकुलाश्रद्धालून्सकविकल्पसूत्रचतुरान्लब्ध्वाशुचीनृत्विजः
॥ प्रीतिंभागवतींप्रकाममभिसंधायाहरंतःक्रतून्धीमंतोयुगमेतिमंक्षुकृतयंत्यंतेसुखाःसंततम्॥ ६१॥ किंच॥ अयज्ञार्हद्रव्यावयमितितुयज्ञा
द्विरमतांनकल्प्यंतस्मान्नैर्नतुभगवदाराधनमपि॥ प्रयत्नेनद्रव्यंशुचिकिमपिलब्ध्वाभगवतःकृतंचेत्तैःकर्मकिमितिनतदेवाध्वरमयम्॥ ६२
॥ अपिच॥ हिंसाकृतप्रत्यवेयादितिकथयतियोवेदएवैषयागेपश्वालंभंविधत्तेयदिकद्रुहमस्त्वैदिकःसंशयीत॥ हिंसात्वाभावमेवाध्वरपशुनि
हतेराहसमानुजार्यस्तत्पक्षस्थोपियोनप्रसजतियजनेकस्तदन्योगुरुर्हि द्रू॥ ६३॥ इदंचावधेयम्॥ हिंसावरेषिवमखाश्रितहिंसनेपिजैनेतरो
पदिजनोभजतेजुगुप्साम्॥ नार्यंतरोषि वनविंदतिनंदनानांनिष्पादनेकिमनघेपिनिजेकलत्रे॥ ६४॥ इदमप्यवगंतव्यं॥ कलिमिविशुद्धिविरहादि
शंकयाचेत्कैश्चित्कलौनहतिनिस्समपिक्रतुते॥ मुंचतिगुर्वशुचिताविशंयेनकिंक्षचक्रांकवैष्णवमनुग्रहणादिसर्वम्॥ ६५॥ किंच॥ सर्वैर्वेदैःस्मृति
गुणपुंतिःसेतिहासैःपुराणैःशिष्टाचारैरपिनियमिवानध्वरान्मध्वरावेः॥ आज्ञासिद्धानहहजहतस्तान्हिसंहानिकल्पान्यातन्वंतःकतिचिद्वितरा
नप्पमीशिक्षयंति॥ ६६॥ किंबहुना॥ यागंयेवतवैष्णवाविजहतिच्छागच्छिदाभीतितः शिष्यक्लेशनसाध्वसाज्जहतुवैचक्रांकणप्रक्रियाम्॥

१ पशुहिंसनं २ कलिसंज्ञं। ३ कृतयुगवत्कुर्वंति ४ ब्रह्मनिष्ठा ५ प्रत्यवायंप्राप्नुयात् ६ संशययुक्तो भवेत् ७ प्रवर्त्तते ८ संशयः ९ समुद्रा १० मंत्रोपदेश ११ मुद्राधारणप्रकारः

पूर्वस्मिन्वस्तुसंमतिर्भगवतः प्रीतिः फलं नो धनान्यल्पीयोऽभिमतिः परत्र फलमप्यर्थाप्तिरित्यंभिदा ॥६७॥ कृ० ॥ विहस्य ॥ तप्ताभ्यांशेरवचक्रा-
भ्यां तापनं प्राणिनामिदम् ॥ छागालंभसमत्वेन साधोः किमिति वर्ण्यते ॥६८॥ वि० ॥ गुणदोषतारतम्यानभिज्ञ शृणु तावदिदम् ॥ छागालंभसह-
स्रतः क्षितिसुरस्यैकस्य हिंसाधिका तस्मात् ब्राह्मणतापनं नु किमिदं तुल्यं यशोर्हिंसया ॥ शास्त्रान्तरप्रयोगधारणमपि श्रेयस्करं चेन्न दावेदे-
वसवे पशोर्विशसनाद्धर्मोऽपि किं हीयते ॥६९॥ कृत्यलंकृत्य पशुं तद्विहितसवनकरणावश्यकतासमर्थनेन करवदरास्तित्वसाधकप्रमाणान्तर-
परिकल्पनाकल्पेनेति दक्षिणतो विमानमानयन्स शिरःकंपं रवजीकृताखिलहृदारमणीमणीनां मंजीरमंजुतरशिंजितरंजितेन ॥ वंजीपुरीपु-
वगणेन च कास्ति पूर्णा संजीविता ग्रपरिवंचितपंचबाणा ॥७०॥ किंच ॥ ऋक्सामयोश्च यजुषां च निवासभूताः पूताह्निनाः स्मृतिपुराणकला-
धुरीणाः कुर्वन्ति वासमिह कर्कशतर्कशब्दतंत्रत्रयीशिखरसिंधुतलस्पृशो मी ॥७१॥ कृ० ॥ सहासम् ॥ नैतद्धि भाति नगरेन नगरस्य दुर्गप्राकार-
साधनदशा सुविशांपतीनाम् ॥ पुष्ट्यान्नमङ्गटभिरस्तटनिस्रुतासृक्स्रोतःसहस्रभरविस्नपङ्कास्थिसान्द्रम् ॥७२॥ विश्वा० ॥ वयस्यैरगुणाढ्य-
मस्य पुनरस्य नमस्यानिंदाद्वयनाम प्रशंसामेव भवान्कृतवान् ॥ यतः ॥ पुरातनानां हि पुरान्तराणां प्रशोधितारोऽपि दिशांस्म भूपाः ॥ पुरं तदेतद्धि पुरं तमा-
जौ हृताभ्युपेतप्यलभ्यर्थयन्ते ॥७३॥ कृ० ॥ निरूपणमभिनीयसास्वरसंहतविरंतनानामिदानींतनानां च वसुंधराधुरंधराणां अवारणीयो सा
वविवेकः ॥ पद्य ॥ प्राज्ये हंत धने स्थितेपि नृवरा राज्येपि सत्यूर्जिते संभोगानुगुणाविलोचनगुणैरंभोजदं भङ्गुरः ॥ कल्याणीस्तरुणी रुपेक्ष्य
करुणाहीनः ससेनः स्वयं हर्तुं शत्रुधरां विराद्रभिलषन्मज्जुरणे जृंभते ॥७५॥ वि० ॥ विरुद्धबुद्धे विवेकमेवं तावद्विवेकमाकलयसि ॥ तथा हि
॥ संपद्धन्यसरिद्धरीसहचरीशोपी समं प्राभेवं नार्यः सूर्यकरावलीढरजनीच्छायासहृद्यौवनाः ॥ देहः स्नेहविहीनदीपसदृश इत्यालोच्य

॥ टि० ॥ १ हिंसया २ सहस्राणि ३ विच्छलीकृत ४ शिवः ५ अधिपतयः ६ संग्रामः ७ स्वीकृत्य ८ क्षुद्रनदीवत्स्वल्पकालस्थायिनीम् ९ विद्युत् १० प्रभुत्वं ॥ ॥

पृथ्वीश्वराः प्राणान्जुहूतिनाकमाकलयितुं श्रद्धाहियुद्धानले ॥७५॥ शृणु सखे चमत्कारम्॥ रक्तेभदेरणमुखे रुधिरेण तस्मिन्रक्ताभव
त्यमरयोषिदनुव्रतेव॥ शूरः सचेद्तनुसायकखंडितांगः साप्युच्चकैरतनुसायकखंडितेव॥७६॥ किंच॥ दीप्तोति प्रभमाश्रितस्थिति तरुंदि
व्यविमाने स्थितो गाढाश्लिष्टकृपाणपाणिकरजग्रस्तामरस्त्रीस्तनः॥ तत्संदत्तनखक्षतोऽबहुतरं भेत्यर्थिवाणक्षतं युद्धाग्नौ हुतजीवितुं निजव
पुर्वीरो मुदा वीक्षते॥७७॥ इत्यन्यत्र विमानं संचारयन्परितो दृष्ट्वा॥ पिनाकिनीं पश्य पवनाघनाशिनीं जलाच्छलघ्वीं गरुडापगामपि॥ इदं तटे
राजति देवनायकः परोऽत्र सर्गी दिवदेवनायकः॥७८॥ इतरत्र विमानं प्रस्पंदयन्सानंदम्॥ अद्य पत्तं प्रक्रिमं सच्चरित्रं देवः प्रीतः स प्रभाताति
शामे॥ श्रीमुष्णयन्मुष्णदंहः सहस्रक्षेत्रं प्राप्तं नेत्रयोः पात्रभावम्॥७९॥ अत्राहि॥ वराहरूपिणी चराचरांतरस्थिता सुरासुरानुसेविता
धराधराद्दिदेवता॥ सदा सदा वलक्षितामुदामुदारसेवधिर्हिताहितोक्ष्यकेतनानतापतानतानपेत॥८०॥ श्रीमत्कवींद्रश्वात्र कश्चिदित्यमनु
संधत्ते॥ सत्वावदात निम्नगा वटीकुटीस्वासिनी कटीस्फुटीभवत्करा कटीश्वरीपटीयसी॥ रसारसाद्दिहा दिवारसालसालसंवृतेवने वने श्रुरी
क्षिता मही क्षितादिदेवता॥८१॥ कृशानुः॥ सोऽयं हे यप्रत्यनीको पिशार्ङ्गी कष्टपृथ्वीकांक्षया भूहराहः॥ इत्थं सिद्धे बूहि भूलाभलोभात्कं कैव
र्णमानुषीं निदधत्ते॥८२॥ विश्वा०॥ अनभिज्ञो भवान्भगवदावतारहस्यस्य॥ शृणु॥ पाठीनी यंका मठ केठभारिः कैटरूपपातु कांठीरवं वा॥
अन्यह्यापरसर्वमप्राकृतं तत्न्यासौ तेष्वप्युज्झतिस्वस्वभावम्॥८३॥ किंच॥ श्रीकोलं भुविकोलं जगदालंबमवैतुं स्वामीशुभकामी किल भू
मीमस्करान्तिम्॥ वाराशि गभीरां भसि कारा भवनेभियस्तामिह मुस्तामिवयस्तामुदहार्षीत्॥८४॥ स भक्तिं प्रकर्षयन्नवाराहमभिध्यायन्
तन्नामेत्य॥ द्राधिष्ठंक्रुहनावराहभगवन्दंष्ट्रात्मकं तेदृढस्तंभं संप्रति चिंतयामि जलधिस्थे ह्योघसंपूरितम्॥ यस्मिन्विंदति दीपभाजनविधा
वामेदिनीमेदिनीचित्रं तत्र चकास्तु साऽनुरयतैर्निष्कंपदीपाकृतिम्॥८५॥ टि० १ अनुरक्ता २ कामवाणः ३ एतनटे ४ निधिरूपा ५ शोकमहेशो ६ याहत्यम् ७ आराहं ८ उत्पूनवान्

कूलंकषाभिक्रममंदानिलस्पर्शसुखमभिनीय सानन्दम्॥ कल्हारोत्पलतल्लजोल्लुलनवत्कल्लोललनिलोलनक्रीडापादपगाढरूढहिमता
सौरभ्यविश्राणितः॥ कावेरीसलिलावगाहरसिकः कस्यैष नेड्यो मरुत् क्रांतानामुडुराध्वनीनवपुषां यन्निर्धुनीते श्रमम्॥८६॥ कावेरीनिरीस्य
सशिरःकंपम्॥ हंत रंगपुरसंगतमन्नोहं तरंगचलपंकजसंघम्॥ सह्यजायतदहं रं बहु मन्ये सत्यजायततमःशमनार्थम्॥८७॥ एषा खलु दोषा
कुलसकलमनुजकुलसकलकलुषशोषणबद्धकंकणा निजतटनिबिडतमबकुलधवलकुलतिलकामलकाविरलसरलकुंदखंद
नमंदारसहकारकेरलकेसरसारलबदरकदंबकदंबकगंभीरजंभीरजंबीरजंबुसपूर्णपर्णकुसुमपलाशसमृद्धकपित्थलोध्रखदिरधवशिलींध्र
पाटलपटलजलिकुक्रमुकप्रमुखविशंकटविटपिमंजरीपुंजसंजरीजृंभदुरुतरश्रमशामकरमकरंदरसग्रसनतात्पर्यपरपट्पदप्रविभ्रमालु
बरोलुवनीकुरंबकरंबिततया कलिंदनंदिनीप्रतिच्छंदतामनुविंदती निशाकलिततविशालस्फुरद्दशा भवश्रमशालिक्षितीशालिनिशांतकु
शाङ्गीजनमज्जनवेलाडोलायितपृथुलहारप्रत्युप्तमुक्ताफलरुचिनिचयपरिचयपरिचितया शुचितयापि पीतांबरपदांभोरुहसंभवसरिदंबुडंबरवि
डंबयती सततमंतर्गतचिरंतनपुरुषतल्पीभवदनंतफणामणिघृणिश्रेणीशोणीभूततया सरस्वतीमनुकुर्वती पार्श्वद्वय्यामपि नैत्यिककर्मानु
ष्ठानपरत्वबद्धासनशतसहस्रावनीसुरारब्धानवद्यब्रह्मयज्ञसमयसमधिगतमंत्रब्राह्मणाम्रेडनपूर्वकमजस्रसहस्रपत्रमध्यमध्यासीनानां श्रीरं
गराजनाभिसरोजराजमाननिखिलनिगमपठनमुखरचतुर्मुखमुखवैखरीं व्याचक्षणानां मदकरमरालयूनां वरटापरिरंभपरिचुंबनसुखानं
गसंगरप्रक्षोभसमुत्थितैरभिराममगरसपरागैरभिनवचंदनरसमसृणशरीरेव सलीलमाकंठनिमग्नमूर्तीनां सुगात्रीणां वदनैरदसीये
पयसि विहायसाभ्यासेन समागतश्चंद्रमाः सन्निहितश्रीरंगधामास्वसमाननामा विधुर्विरचितानेकावतार इतीर्ष्ययेव स्वयमपि बहूनि रूपाणि

टि० १ पेशा: २ अत्र अहमिति च्छेदः ३ सः हि अजा पवेति च्छेदः॥ ४ बहु ५ हंसी॥

१·२ २३

दधानो विराजत इति भ्रांत्यां सत्यामनुरागमां द्यसंपादिकायामितरेतरदृढाश्लेषोन्मिषत्तोषाभिः कोकदंपतीपरंपराभिर्निराकृतापामकुंठो
त्कंठेन सुरलोकेन निर्निमेषमवलोक्यमानैरलंकृता सरस्वत्याभिमुख्येन कवेरात्मजेति प्रसिद्धिं सार्थयंती शांतनवास्पदतया गांगेयत्वं
गिणीति संज्ञामन्वर्थयंती समज्जनदुरितहरापि नमज्जनदुरितहरा निराकृतपथिकविश्रांतिः स्रवंती यं कदलयति चक्षुषोरमंदमानं
दम्॥ अहसति भवशोषकरी भवेन परितोषितां स्वर्णनदी॥ दुर्वर्णरुचिरफेनैः सत्यसृतां जान्हवीमसत्यसृता॥ ८८॥ पुनःसश्लाघम्
स्वर्णवतं तु विदुः कां तरामां हेमापगामिमाम्॥ दांपत्यमनयोरेतदनुरूपं विशोभते॥ ८९॥ कृ०॥ साक्षेपम्॥ परिशोभितांम्रपाश्वोमध्यमहि
तरंगराजंतः स्फुरिता॥ कथमिव दधाति कीर्त्तिं कावेरी कनकनिम्नगेत्येषाम्॥ ९०॥ विश्वा०॥ आपातदूषणमिदं निरूप्यमाण अस्यागुण
एवस्यात्पश्यतावदेनांपरमरमणीयाम्॥ पीतांबरालंकृतमध्यभागा कल्हारमालाकमनीयवेणी॥ सैत्याद्रिकन्याजनकस्यगेहात्पत्युः
समीपं व्रजति प्रसन्ना॥ ९१॥ पुनर्निर्वर्ण्य॥ उद्गच्छदच्छतमगुच्छलसच्छिरस्काऽस्तीरद्रुपेपितरवः प्रतिभांत्यमुष्याः॥ एनांतरीतुमिहपक्व
जुषः स्वशीर्षबद्धावदातवसनाः पथिका इवामी॥ ९२॥ किंचिदंतरमुपसृत्याधस्तादवलोक्य सहर्षम्॥ सारंगडिंभनयनानवकेलियो
ग्यनारंगमुख्यतरुपुष्कलनिष्कुटयम्॥ श्रीरंगदिव्यनगरी प्रथतेऽनयाब्धिपारंगतैर्बुधजनैः परिसेव्यमाना॥ ९३॥ निपुणं विभाव्य स
शिरःकंपम्॥ हंसानि ष्कुटदीर्घिकावसतयः प्रक्रांततर्कावहालीलोद्यानचरः पतंजलिगिरां पुंस्कोकिलः खेलति॥ द्वैताद्वैतकथा यथा
विदधति क्रीडाकुमारा इह स्वैरं तांत्रिककारिकाः परिपठंत्येतामुहुः सारिकाः॥ ९४॥ किंच॥ प्रातःप्रातः पयसि विमले पावने सद्यउन्याः
स्नात्वा पस्त्वा यं सकलविषयत्यागिनो योगिनोऽमी॥ वारंवारं भुजगशयनं लोचनाभ्यां पिबंतोऽक्षामक्षेमाः क्षणवदखिलं कालमत्र क्षिपंति॥ ९५॥ कृ०

टी० १ कवेरात्मजा कन्येति श्लेषेण २ शोभनं तमर्णवं सुवर्णयुक्तं च ३ आम्रताम्र इति पदे ४ त्रपु ५ रूप्यं पक्षे तसिमत्ययां तम् ६ बहुलकल्याणाः॥ ॥ ॥

२

वयस्यविस्रब्धमेवाभिभाषसे॥ सारंगदृष्टीः कथमुत्सृजन्त्यः सारंगदृष्टीः स्वदते मुनिभ्यः॥ कवेरजासंगतिमुच्छ्रिसृतो: कवेरजासंगरुचिः क
थंस्यात्॥९६॥ वि०॥ सरवेभवता भणितानापदानांव्यासेनैव विरोधः समधिपद्इत्यग्रतः पश्यन्नंजलिंबध्वा॥ श्रीरंगेशोभते यस्य श्रीरंगेशोभ
ते चयः॥ नमोहं कलयेतस्मै नमोहं कलपेततः॥९७॥ किंच॥ प्रणिपति कर्मकुर्मः फणिपतिभोगेशयं रथांगशयम्॥ कारणमेकं जगतां वारण
पतिभीतिवारणं ज्योति॥९८॥ कृ०॥ किमस्मिन्महाभुजंगेक्षिपंते त्वया प्रणामाः॥ तथाहि॥ भूपामोत्तुंगपयोधरोज्वलरुचिस्तन्वन् भुजंगा
न्वयं श्रीरंगस्थलनित्यवासिरसिकः शृंगारिणामग्रणीः॥ प्राकारप्रकरांतरस्थितिमतीयाराजपक्ष्मिन्यहोनिः शंकेपरपूरुषुष्विरमसौनिद्रा
तितत्संनिधौ॥९९॥ वि०॥ श्लेषावलंबनाद्दोषानमेरोषावहाः॥ प्रस्तुततोषावहाइतिनाहमृत्रोत्तरयामिपुनर्निरूप्य॥ क्षितिभृद्दिर्निजमौलि
षु धृतपादोविहितापकारीच॥ इंदुरिवरंगबंधुर्दोषाभावे विलोक्यतेकिंतु॥४००॥ यद्वा॥ नविधौ शुभरंगलक्षितांगे स कुमुदाप्यायनकारिणी ह
दृष्टे॥ कुलयामि कुरंगलक्षितांगं कुमुदाप्यायनकारिणं विधुंतम्॥१॥ पुनः संचिंत्य सविस्मयम्॥ रंगेशः सवको युक्तं नोर्चरीतिं भजेदिति॥ चित्रमेतद
संगीतिव्यपदेशं यदश्रुते॥२॥ अन्यदद्भुतमुद्भुतमत्र श्रीरंगधामनि। यच्चंद्राभिख्यया प्येषा शोभते पुष्करिण्यहो॥३॥ समंताद्वलयं स्यस भ्रमघम्
ारंगास्त्रमिदं रमेशितुरभिव्यक्तिस्थलेष्वादिमं तीर्थं सेवमरुद्वधाभगवती यां ताप्तवीनिश्रुतिः॥ सर्वोत्मानगरस्यचास्यजगतां निर्वाहको नायको
वासश्चेदिहलभ्यते जगति कोवैकुंठमुत्कंठते॥४॥ कृ०॥ सार्धंगीकारम्॥ सोयंयद्यपिह्रद्य एवविषयः सांप्रतनंदीवरश्यामांगेन सनायकः कृत
तमोभंगेनरंगेंदुना॥ भ्रांताः किंतु चरंति हंतपिशुनाः शांतात्मनां नापदाः श्रीमंतो यदुदंचनाद्भुतनरवल्वत्रासमत्रासते॥५॥ किंबहुना॥ नित्संकोच
नसिंधुमध्यरुचिरो निष्कंपसंपन्निधिनिस्तुल्यामपि कांचनश्रियमुरो मध्ये दधानः स्वयम्॥ बिभ्यत्किं पिशुनेभ्य एष बहुलप्राकारसंवेष्टितेशेते

१ वितसर्पा २ रंगस्थलं क्षेत्रंच ३ चंद्रनृपौ ४ राजापर्वतश्च ५ किरणाश्चरणाश्च ६ रंगसंतके विष्णौ ७ सुरंगमित्यर्थः ८ प्रसिद्धचंद्रम् ९ नृत्सरीतिंआर्तरीतिंच १० संगीत्यभावः संगरहितश्च

धामनिरंगनायकइतिस्वाख्यामिहस्थापयन्॥६॥ वि०॥ सखेनजातुश्रीमतांहानिः॥ प्रस्फुतत इह तृणांपिशुनानामेवभवंत्यनर्थाः॥ परवित्तजिही
र्षयामद्दत्तःपिशुनस्तस्वयमेवनाशमेति॥ कलभःशलभस्यकिंनदाहः पृथुदीपग्रसनायजृंभितस्य॥७॥ अलमन्यप्रसंगेनतमेवचरंगेशंश्रीरं
गधामानमनुसंदधामि॥ सविस्मयं॥ सपर्यावित्रूहादपिग्राममीष्टेसमर्थोजगत्यांयतोरामचंद्रान्॥ अंगाधिराजोदितप्रौढभक्तेरपिप्रापपूजां
सरंगाधिराजः॥८॥ अथवानात्रविरोधइतिसमर्थयति॥ कुमतुहानात्सहस्तसंग्रहीराघवःसमम्॥ इंताकुरंगराजस्यरंगराजमपूजयत्॥९॥
पुनःसभक्तिप्रकर्षभगवंतमुद्दिश्य॥ अकृतस्फुरत्तुतिघोषेशत्रुघुस्फीतरोषनिहतविनतदोषनित्यदास्याभिलाषे॥ ललितवपुषिशेषेलब्धसंपू
र्णतोषेपरमपुरुषश्रेष्ठेपर्वचंद्राविशेषे॥१०॥ भगवन्रंगनायकभवदीयसदभिभाषितुमपिवयंबिभीमः॥ तथाहि॥ कर्तुंव्याकरणस्यवाममिति
रत्वस्यभवत्कीर्तनभाषां व्याकरणस्यसाधुविद्धेयाप्यापदीयापुनः॥ यद्वाहोहिजनेश्वरःश्रुतिमयोयस्यश्रुषाभारतीगोष्ठ्यांत्रस्यतितस्यते
कविजनोरंगेशकर्तुंस्तुतिम्॥११॥ पुनरंजलिबध्वासप्रार्थनम्॥ वरगुणगणसीमावारिदश्यामधामासततममरसामासंघसंगीतनामा॥ परि
हृतभवदामाभातिताकल्यहेमाममकलपतुभूमामंगलंरंगधामा॥१२॥ अन्यतोषीस्यसश्लाघम्॥ स्वामिनीस्तोमिनीलाञ्छमदमोचनलो
चनाम्॥ अंगनांरंगनाथस्यदीप्तिंमूर्तिमतीमिव॥१३॥ देवीमुद्दिश्य॥ मोहोन्मूलनमूलिकाभवजुषांमोक्षाध्वनिःश्रेणिकाचेतःशुद्धिविधान
सिद्धगुलिकाचिंतामणश्चंद्रिका॥ विद्याविभ्रमसारिकाःसितकमलेविष्णोरुरोमालिकामातस्त्वममपारिजातलतिकामोदांबुधेर्वीचिका॥
॥१४॥ कृ०॥ कांत्येवहंतरत्स्यापिकमलामपिचंचलां॥ अशिष्टेष्वेवरज्जंतीमभिष्टौतिकथंबुधः॥१५॥ तथाहि॥ प्राकृपर्यंकमधिष्ठितोपिम
धुरंपल्लाणशय्यामपिप्राप्यःप्राशयतेकदन्नमिवयःक्षीरोदनंभुक्तवान्॥ प्राश्नात्येषकेदुग्धिकाममृतवत् प्रागात्तपीतांबरःकंथांयाचति

टी० १ सभा २ स्थित्यास्वभावेनच ३ विद्युतंचपलांच ४ दुर्यवागूः॥

भृत्यति क्षितिपतिर्लक्ष्मीकटाक्षाश्रये॥१६॥ अन्यच्चावधेयम्॥ दातुर्द्वारि य एष वारणमगात्तद्वार्यहो वारणं पश्याम्यद्य चिरादशेत भुवि यो भूस्तस्य शेते भुजे॥ नाहारान्न पिले भिरे यदवलाहारान्न भूस्तत्त्रियाविदं तेकमलाद्दृगूर्मिभिर्हो निम्नेभवत्युन्नतिः॥१७॥ इदं च बोध्यमित्युद्दिश्य॥ दृष्टे बंधुजनान्धनार्थमनघान्गंतुः परस्त्रीशतं रंतुं जंतुविहिंसकैः सहजनैः संतुष्यतो वंचनैः॥ वक्तुस्तीक्ष्णमयुक्तमेव वचनं पंकुमितं चादनं नित्यं नृत्यसि मंदरेषु कमले कल्पांतवैतन्मतम्॥१८॥ अन्यच्च॥ एषामन्यकलत्रदर्शनकलान्युत्पत्तिशून्ये दृशौ मूढं हृच्च परार्थचिंतनविधौ भिक्षा नभित्त्वं मुखं॥ अप्रज्ञातपशून्बुभुक्षितशिशून्नभोदकैस्ताम्यतस्तेषां लक्ष्मि गृहान्दृशा च भयभीते वेहनावीक्ष्यसे॥१९॥ वि०॥ सखेमनसः ५ सेहूजननी तवेयं वाणी॥ यतो दुःशीलेषु दृश्यमानाः साधुजनानुपयुक्ताः संपदाभासाः प्रस्तुत मृत्फतरणकारणभुवनजननी कृपाकटाक्षवैभुर्ये निबंधना एव॥ उक्तं हि॥ गुणहानरुदधिदुहितृवैमुख्यनिबंधनत्वमुचितं त्वेन केनचिद्दुषा॥ सद्योवैगुण्यमायांति श्रीलाद्याः सकलागुणाः॥ पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे॥२०॥ ततश्च॥ संपत्तिः किं प्रचैनानां संप्राप्ता कोपशेनया॥ नरकानुभवोदकोनसा लक्ष्मीः कृपाफलम्॥२१॥ तथा हि॥ धन्यंमन्यतया तृणीकृतबुधा धर्मद्रुदुर्मेधसः सेर्ष्याः स्तामसपुण्यलेशविलसत्संपल्लवाः पल्लवाः॥ पश्यास्तूनपहाय पंचषदिनैराकल्पमल्पाद्गमे भोक्ष्यंते बत यातना बहुविधाः कार्त्तीनगर्वांतरे॥२२॥ यच्च भणितं भवता तत्र भवतः शिष्टान्लक्ष्मीन वीक्षत इति तद्ध्यानोपदिष्टे हितमेव॥ यतः साधुजनेभ्यो मुक्तैश्वर्यपर्यंतनिरंतरभगवद्भक्तिसंपदं प्रदत्ते दूरापास्तमारामयविकारा वाराशिदुहितुरुदारकटाक्षसुधाधारा॥ संभोगारंभजृंभन्मदकितवपरीरंभसंपीड्यमानाप्रौढस्त्रीरत्नहारप्रशिथिलगुणवन्भंगुराः संपदोघाः॥ साधूनामाश्रभूवन्स्मरपुरनिरयीकारदक्षा हि लोके भोक्ष्यंते मोक्षमंते स्थिरनिरवधिकानंदधारात्मकं ते॥२३॥ किंच॥ लक्ष्मीकटाक्षपूरः सजयति यदुपच यतारतम्येन॥ नरस्करपशुप्रजानां पतयः स्युर्हि तजंतवः केपि॥२४॥ टि० १ भृत्यवदाचरति २ कृपणाः ३ अन्यायेन ४ औकलिकम् ५ पंचषड्वापानि ६ कृतांतोपमस्य

कु॰॥कमलाकटाक्षाविशायोविभवोपचयहेतुरितिनोपपद्यते॥ यतस्तदल्पीयस्त्वमेवसंपदुत्कर्षसंपादकम्॥ तथाहि॥ गजशिबिकातु
रगाः स्फुरन्नरस्यतन्व्यादृशाहरेस्तन्व्याः॥ तद्भून्नि भवति वा ह्रोनीरदवृक्षाच हृतपक्षीच॥२५॥ वि॰॥ विहृस्य॥ ईदृशीमुत्कर्षपिशुनामरविं
दालयामभिनंदामि॥ किंदर्पदायकधनोपचयेप्रमत्तैः कंदर्पसायकहतेःक्षितिपैरिहेति॥संतःपुरंदरनुतंत्वरविंदनाभेरतःपुरतदवनाव
नुचिंतयंति॥२६॥पुनरनुध्यायसांजलिबंधम्॥मातस्त्वमधुसूदनप्रणयिनिप्रातःसरोजच्छटामुष्टीमुष्टिविचक्षणेशुभगुणेदृष्टीनमस्कुर्महे
॥अष्टाभिःकिलदृष्टिभिश्चतिसृभिर्जुष्टाःसहस्रेणवादेवाद्वादशभिश्चयद्विषयतामेवार्थयंतेक्षणम्॥२७॥इत्यन्यतोवीक्ष्यसानंदम्॥
उग्ररिपुनिग्रहपविग्रहदिवौकश्चक्रकृतशक्रमदविक्रमनिहंता॥मोदरसमादरसमेतइहपूर्णःप्रक्षिपतुपक्षिपतिरक्षिपुगलेमे॥२८॥कु॰॥किं
वर्णयसिस्फुपर्णममुमतिक्रांतमर्यादम्॥तथाहि॥अधिगतनिगमांगोपिद्विजराजोप्यच्युतंदधानोपि॥निजगारकथंकारंनिःशंकंभिल्लपल्लि
कांगरुडः॥२९॥वि॰॥पक्षिराजस्यभिल्लपल्लिकानिगरणेनसाधुजनानुग्रहासाधुजननिग्रहसामर्थ्यसदसद्विवेचनचातुर्यंचव्यंजितमेतत्कथ
भूषणमेवदूषयसि॥शृणु॥गरुडोगिलन्नकिमपिकिल्बिषाविलं खलुभिल्लजालमुषितंतदंतरे॥निरजीगलन्निजगलाद्विलासकृद्भवतःप्रपू
र्णमिवपन्नगेशयः॥३०॥हंतशकुंतपुरंदरस्यास्यस्वच्छंदविहारावसरेष्वप्यभंगुरमेवस्वामिकैंकर्यम्॥यतः॥स्वजन्येष्ठप्रेयहृयोश्रितरथघूर्णि
मन्मंडलस्याच्युतोप्यसन्मार्गपक्षवातोद्गतधरणिरजच्छन्नमेतज्जवेन॥कल्लोलैरुल्लसद्भिःप्रचलजलनिधेःक्षालयन्घूर्णदर्णःप्रेंखद्दिंडी
रखंडच्छलकुसुमकुलैर्मंडयत्यंडजेन्द्रः॥३१॥पुनरभिध्यायन्॥यद्वीक्षाधैर्यरक्षाकिलपुलकभृतांपाचतांदेवतानांसेवासंमर्दकाले१
गिरिशफणिगणाद्विभ्यतामभ्यतानीत्॥सोयंगंगेयपृथ्वीधरवरशिखरच्छायदायादकायश्छिंदन्वृंदंरिपूणांकलयतुकुशलंच्छादसो
नःशकुंतः॥३२॥पुनःसविस्मयम्॥नगरूपमुपैतिपुत्रमंगीकृतशाखोपिसुपर्णउन्नतोपि॥टि॰१ वृक्षरूपत्वं २वेदशाखाःशिखाश्च ३ दलानिपक्षाश्च॥

विनतेकविधेयएषचित्रं स्थिरमामोदमगान्मधौर्विपक्षात्॥३३॥ अथ सर्वतः पुरीं निरीक्ष्य सांजलिबंधम्॥ श्रीवल्लभदासेभ्यः श्रीरंगक्षेत्रनित्यवा
सेभ्यः॥ त्रुटितभवत्रासेभ्यः नमोऽस्तु कृत शिष्यधीविकासेभ्यः॥३४॥ कृ०॥ सखे सर्वानितस्तु रवास्तव्यान्मास्म भवान्नमस्कार्षीत्॥ निखिलास
गुणस्तोमैर्हरिदासैरलंकृते॥ अत्र शूलाः कति पयेपट्टनेऽस्मिन्प्रतिष्ठिताः॥३५॥ निरूप्य सविस्मयं॥ शाक्राद्यर्थे द्रविणग्रहरंहोरिणास्वादितपत्
दत्तवित्तग्रहणचपलाः केऽपि विक्रीणतेतत्॥ धामश्रीमद्यदिमधुजिता धीयते स्वीयमेतेन तत्रस्यं तेधनकणतृषास्तत्र विक्रेतुमज्ञाः॥३६॥ वि०॥ मै
वमतेमैवं॥ किं किं नजीर्यति मुकुंदपदारविंदद्वंद्वाभिवंदनकृतामिह देहभाजाम्॥ अत्यद्भुतौषधविशेषनिषेवकाणामापाद्यते किमनर्थमप
थ्यसेवाम्॥३७॥ समंतात्पुरीं निरीक्ष्य सश्लाघम्॥ रंगादन्यदनगारैः कसारैर्वास्थलेख्यहैः॥ किं दृष्टं किमपि क्षेत्रं सप्तप्राकारवेष्टितम्॥३८॥ कृ०
वयस्य मैवंवोचः॥ अभ्यर्णस्यपुरस्यैतद्धिसख्यात्मजातटम्॥ शैवक्षेत्रमवेक्ष्येथाः सप्तप्राकारसंवृतम्॥३९॥ विश्वा०॥ विहस्य सत्यम्॥ ज
टाधरप्राकारसंवृतस्यास्य श्लेषेण पुण्येनैव रंगसाधर्म्यं समर्थनीयं निपुणं निरूप्य॥ नंदत्कंदर्पदर्पक्षपणनिपुणदृग्वह्निसंपर्कलाभारूण्यः
फण्याग्रगण्यप्रकरमयतयाभीषणैर्भूषणैर्यः॥ कांतः सांतः पुरः सन् कवलितगरलो राजते राजतेऽद्रौ मत्यां सत्यात्मजाग्रे विहरति सुचिरं शंकरः
शंखरोचिः॥४०॥ कृ०॥ सखे नात्रस्यात न्यम्॥ यदिह किंचिद्विलक्षणारीतिरालक्ष्यते॥ पश्य॥ येतोयैर्नादेयैरभिषिक्तास्तेहि तापमुज्झंति॥ प्रत्युतज्ज
हातितापं कावेरीशंकराभिषेकेण॥४१॥ वि०॥ कुतएवं॥ कृ०॥ शृणुतावत्॥ गंगानुषंगाद्यमुनाप्रसंगादर्थैत्यसद्भूततापा बत सह्यकन्या॥ गंगाधरेस्वैरभि
च्यमानेतोयैः स्वयं तापमियं जहाति॥४२॥ वि०॥ दृढंदृशं दूषणगुणग्राहिणामभिमतमेवेति अन्यतो विमानं प्रस्थाप्य सानंदम्॥ अमी खलु॥ व्याला
धिपशायस्तुभस्थलभूषणेलाः स्वेलाशनापतनसादृतरांतरालाः॥ चोलावि भांति पवमानविहारवेल्लद्दोलायमानसहकारनवप्रवालाः॥४३॥
निपुणं विभाव्य सोत्कंठं॥ नागवल्लीमतल्लीभिः स्मेरमुखीभिरिवादरात्॥ ॥टि०॥ १ नम्राः २ वसंतदेव्यौ ३ पकारान्तकयस्थानानि ४ प्राभिर्जटाभिः सहितः शंकरस्त सप्तप्राकारः॥

परिरब्धाःप्रमोदंतेक्रमुकाःकामुकाइव॥४४॥इतश्चभवानवेक्ष्यताम्॥अभ्रंलिहानहहपश्यमरुद्बुधायारोधोरुहःपृथुफलानिहनारिकेलान्॥
आगच्छतेसवितृमंडलमाश्रितायदेवायभक्तितइवात्तनवोपहारान्॥४५॥कृ०ममत्वेवंमतिः॥लोलद्दीर्घदलाबृहन्नरफलावातोल्लसद्धूलिभि
श्छन्नाःप्राकृतमाःस्फुरंतिपुरतोयेनारिकेलद्रुमाः॥धूमास्वादनपात्रधारिणइमेद्रागिष्ठचंचज्जटाभस्मोद्धूलितमूर्त्तयोविवसनाःपाखंडिभेदा
इव॥४६॥वि०॥सहासमन्यतोनिर्दिश्य॥पद्मिन्याकर्षोचितगंधप्रसवान्प्रपश्यपुन्नागान्॥अतनूयाशुगकेलनात्संप्रासानधिकरेणुसंपर्कम्॥
॥४७॥पार्श्वतोवीक्ष्य॥अहोमहोन्नताजनपदानाममीषामभिजा ता॥पश्य॥ज्योतिष्टोमस्तोमउक्थ्यातिरात्राप्तोर्यामःषोडशीवाजपेयः॥मौ
ढायज्ञाःपौंडरीकादयोयेचोलेष्वेतेचित्रमोपासनंति॥४८॥पश्य॥गृहेगृहेपश्यकृताग्निहोत्राःश्रास्त्रौषधोल्लाघहतद्विदोषाः॥पुण्योत्तराःपंडित
पुंडरीकाःपुनंतिवेदैकधनाजगंति॥४९॥कृ०॥एतद्विषयविषयाश्लाघाशास्त्रानुशारेणनकर्तव्या॥यतएतद्देशवसतांसतामप्यनेकप्रकारादुरा
चाराउपलभ्यंते॥स्नातिप्रातरधिस्त्रवंतिविधिवत्संध्यादिकर्माचरंत्यग्नीनादधतेमखान्विदधतेशास्त्राणिचाधीयते॥अभ्यर्चंतिसुरान्परा
र्घ्यकुसुमैरर्चंतिकिंचातिथीनन्यैःकिंतुपुरातनैस्तनुममीपुष्यंतिदुष्यंत्यतः॥५०॥पुनर्निरूप्यसविस्मयम्॥कष्टमेतद्देशवासिनीनांविलासिनी
नांलज्जाव्युत्पत्तिराहित्यम्॥तथाहि॥अपिहृतचोलवासेस्थैर्यवतीनांविरागयुवतीनां॥अपकंचुलिकाबंधौकुचकुंभावितिविरुद्धमुपलब्धम्
॥५१॥किंच॥अगूढगाढस्तनकुंभिकुंभमंभोजदंभोदयजैत्रनेत्रं॥वित्तेनिधत्तेवतचोलदेशस्त्रैणंप्रवीणंरतिकांतबाणं॥५२॥अपिच॥नवा
र्त्तवमहोत्सवेनतुसहस्त्रशःसंगतागृहाद्बहिरशंकितंगदितकामगाथाशताः॥अहार्यैककठिणस्तनप्रकटनादनागस्विनोमुनेरपिघनांधृ
तिंचुलकयंतिचोलांगनाः॥५३॥वि०॥वयस्यमास्मनिंदचोलमंडलवासिनोजनान्॥याभिःसर्वपदार्थशुद्धिरुदितातास्वप्स्वदेवार्पितंनि
टी०१कावेरी२अतनोःकामस्यबाणाःपक्षेअतनुर्महान्वायुः।३पल्लवितेसर्थः४नद्यां५वस्त्रंवसतिश्च६स्त्रीसमुदायः७अगस्त्य८प्रसूनिमितामिवस्वल्पांकुर्वंति॥

त्याज्यंशास्त्रनिषेधत स्तदिति चेत्साज्यंसतैलंचतन्नोज्यंपर्युषितंस्मरंतियदतोयोज्यंनत्त द्
क्षिप्तंनिशिमरक्षितंशुचिहृद्विर्भस्येतचेत्कास्ति ॥ नारीणांस्फुरतोपयोग्यवयवे
वर्णेः ॥५४॥ पातिव्रत्यमुपेत्यनित्यमनघाचारावदातात्मनांचोलीनायदिकंचुकीनकुचयोर्मालीमसीकाततः ॥
स्पष्टीकृतिदोषदुष्कर्कचेद्धरापिधानमपिकिंनस्यात्सदावाससा ॥५५॥ पार्श्वतोवलोक्यसश्लाघम् ॥ अस्यदेवस्यभाम्यवत्तारवल्वियत्ता
परित्यक्ता ॥ यतोत्र ॥ मणिमयफणितल्पेमल्लिकापुंजकल्पेशमितजगदभद्रांसंश्रपन्योगनिद्राम् ॥ देहरकुहरवर्तीदेवताचक्रवर्तीदलि
तदुरितवाणेदृश्यतेकुंभकोणे ॥५६॥ अंतनागिरिकिंजनतामवेक्ष्यसशिरःकंपम् ॥ स्नात्वासहस्रकृताजलेशुचितमाभूत्वाजपादिक्रमैदुं
त्वाग्नौचहविःकृतैतरगिरांकृत्वाचपारायणं ॥ नत्वाशाङ्र्गधरंभवामयहरंस्तुत्वाचतंभक्तितःश्रेष्ठाःकालममीक्षिपंतिबदवःश्रीकुंभकोणो
ह्निजाः ॥५७॥ इतश्च ॥ कुटीषुगोपीरुचिरासुयोकेभूनटीषुगोपालइतिश्रुतोचरत् ॥ अकंपकारुण्यमुपेत्यमोदतेसचंपकारण्यमगण्य
वैभवः ॥५८॥ अत्रकिलराजगोपालपादकमलमुपाश्रयतःसाधुजनस्येत्थमनुसंधानम् ॥ कोपाटोपदशाविशालुपरुषालापादिरूपाशुभ
व्यापारस्तपितार्थिलोकहृदयेभूपालपौरोरलम् ॥ तापाविष्टसकृत्प्रपन्नजनमुक्त्यापादतेदीक्षितपापानामपनोदनायकुहनागोपालमे
वाश्रये ॥५९॥ कृ० ॥ अत्रापिममाविरोधएवप्रतिभाति ॥ यतः ॥ न्यस्तपादःकमनसांशीर्षेषुमेधुहार्यहो ॥ मुरारातिर्हरिर्कोपिचंपकारण्यमा
श्रितः ॥६०॥ वि० ॥ विरुद्धानामपिसहावस्थितिसंपादकेदेवेषास्तदेवकानामविरोधकथा ॥ यस्मिन्विलोचनतपासहपुष्पवंतौ पर्यंकताहन
तयाफणिपक्षिराजौ ॥ तेजस्विनौप्रमुदितौस्थितिमाश्रयंते तस्मिन्नहोभगवतिक्कविरोधगंधः ॥६१॥ इतिपरिक्रम्यावलोक्यप्रांजलिः ॥ प
रिगतस्मरकारैः प्रांशुभिर्नारिकेलैर्दिनकरकरधारादुष्प्रवेशांतरेभ्यः ॥ चुलकितदुरितेभ्यश्चोलदेशस्थितेभ्योनमइदमखिलेभ्योनायदि
स्यलेभ्यः ॥६२॥ कृ० ॥ भवतुवैवैतेषुनमस्कर्तृता ॥ ॥टि० ॥ १आकाश २वेदानां ३यमुना ४दूराजभिः ५दैत्यमकरंदश्च ६चंद्रसूर्यौ ७ अनचौर्यपरैः ॥ ॥ ॥

समस्तदेवलकादिदेवास्येपि विदुराचारानालोकयतो न भवति नमश्चिकीर्षा॥ तथाहि॥ वारस्त्रीकुचमर्दिभिर्विचरपंत्यर्घ्योदितश्चेकरैस्त
द्वीर्यैरस्त्रभासितैश्च वस्तैर्जेल्पति मैत्रानमी॥ द्रव्यं देवलका हरन्त्यचकितो देवस्य तत्पूजितास्त्वेतासु प्रतिमासु हेतभविता किं देवतासन्निधिः॥
॥६३॥ किंच॥ आघाताबत पुण्ययौवतकचानीकमेसंध्यादिकैयैरभ्यस्तमभूदसभ्यवचनं नत्वेवमवेदाक्षरम्॥ अधमैर्योपरैर्दूरन्वयभवैः सूदैर
मीभिः कृतान्यन्नादीनि निवेदितानि भगवानंगीकरोत्येष किम्॥६४॥ विमृश्य॥ अहो कलिमाहात्म्यादखिलजनानामनिवार्योविवेकविपर्ययः॥
सद्यः स्यादरतोर्पितानिहरयेसत्त्वैस्तैर्भूसुरैरन्नान्यत्र नमानयेमि विधिवित्सिद्धानि वृद्धाअपि॥ देवस्यायतनेस्वदंतिविभयाभ्रात्यैः कृतावो
दनातस्पृष्टान्दृष्टजनेनकष्टमखिलैर्दृष्टानशिष्टाल्हतान्॥६५॥ वि०॥ मादृशोभ्योहिदिव्यक्षेत्रमहात्म्यवेदिभ्यो भवदीयमत्र दूषणं न रोचते॥
यतः॥ उपसेवस्तैानादुचितफचिताशालिवपुषो विनीताः स्वेशास्त्रे विगतवृजिनाः पूजकजनाः॥ परित्रातुं लोकान्विधिवदपतंद्रीन्विदधते प
विन्नैरन्नाद्यैः परमपुरुषाराधनममी॥६६॥ आकर्ण्य तामिदमपि यद्भ्युपगम्याप्यभिधास्यामि रहस्यम्॥ विधिवदविधिवद्वा भक्तितो भक्ति
तो वा तनुभृत इह सिद्धोनाथमर्चेत्विहस्याः॥ अनुदिनमुपयातैरर्चमानाः स्फदेवैरुचिरजितमूर्तिश्चास्तिकस्यास्तिकस्य॥६७॥ इदंचावधे
य॥ केचित्त्वेकेधरापराधचकिताः क्ष्मापालभीताः परेश्रद्धातः कतिचित्पनंत्यवहिताः शुधाश्चदिव्यं हविः॥ अयेन्यस्त्वमिदम्मुदेवभगवा
नालोकनैः स्वीकरोत्यहः संहरणास्यपाकृदिदं प्राश्नंति भाग्योत्तराः॥६८॥ पश्यतावत्त्वानुभवसि हैमकर्षनिकषैर्भगवदायतनेन तदिन
स्थलपरिकल्पितयोरन्नयोः॥ उपस्कारैस्तैरुपचितरसामोदभरमप्यवैसन्नेगेहे कृतमनतिभोग्यं बुधजनः॥ अभूयः संस्कारिण्यपि
हविषिदैवालपभवेत्वनल्पं भाग्यत्वंपुनरघहरत्वंचमनुते॥६९॥ इदंचबोद्धव्यं॥ देवागारनिषेविणः किलजनादुष्टंतुशुद्धमनुवातेमी
स्वामिपरिग्रहेणनियतंमान्यामनीषाजुषाम्॥ ॥टी०॥ १ पाककर्तारः २ सात्विकगुणवद्भिः ३ संस्काररहितः ४ विष्णुः ५ भाग्यशालिनः ६ बहुभिः ७ मन्यते॥ ॥

प्रायेणाश्रमगौरवेण लभते हीनोऽपि मानार्हतां कुब्जः क्लीबमुखो जनोऽपि भजते पूजां हि राजाश्रयात् ॥ ७० ॥ इत्यन्यतः परिक्रामन्नग्रतो विलोक्य सहर्षं सांजलिबंधम् ॥ पातु पातकिनो जनानशरणान्पातुं तमः सागरं यातुं पातु पुरीमरीन्रणमुखे जेतुं दशास्यादिकान् । नेतुं भूतनयां मुहुर्विरहिणीमेतुं यशश्चाम्यतं तदा तु श्रीमच्चराघवेण रचितं सेतुं नमस्कुर्महे ॥ ७१ ॥ हंत कठिनानामप्यनुबंधुजने प्रीतिरतिमहती ॥ यतः ॥ लंकापुरं पंक्तिमुखेन रुद्धां भूमिस्सुतां भूमिभृतोऽनुबंधात् ॥ पतिं पुनः प्रापयितुं पयोधौ सेतूभवंतः स्वयमाप्नुवंति ॥ ७२ ॥ निरूप्य ॥ पयोधिमध्ये प्लवमानमूर्त्तयस्तरंगवेगार्पितफेनचिन्हिताः ॥ हसंति किं मंदरमंतरर्णवं निमग्नमेते नलसेतुभूधराः ॥ ७३ ॥ पुनर्विमृश्य ॥ लंकापुरावासिरघूद्वहारिसंपर्कपापादि— वसिंधुराजः ॥ सपक्षभूभृन्निबिडांतरोऽपि विपक्षभूभृद्भिरबंधि कष्टम् ॥ ७४ ॥ शुद्धाः संश्रितधर्मसेतवदृमे सोढोग्रवर्षातपाः स्थित्वा सिंधुजले सदा क्षितिभृतो घोरं तपः कुर्वते ॥ नृत्यंतीरिह नित्यमेव लुलिता स्तीस्त्रैरतन्वाश्रुगैर्लावण्यं दधतीः कदापि न चलंत्यालोक्य वीचीरमूः ॥ ७५ ॥ क्षणमपि ध्यायन् अंजलिं बध्वा ॥ अस्तोकदृष्टिरपि वारिधिरेष यस्मात्त्रस्तो बिभर्त्ति विपुलोपलसांद्रसेतुम् ॥ गोपायते दुरितवंति जगंति तस्मै कोपाय ते रघुपते महते नमोऽस्तु ॥ ७६ ॥ क्रु० ॥ साक्षेपम् ॥ काकुत्स्थकोपचकितः कमितानदीनामासीद्यदा गुरुनगप्लवनार्हतोयः ॥ शक्यस्तदैव तरितुं हरिभिः पद्भ्यां किं वा फलं कथय सेतुकृतिश्रमस्य ॥ ७७ ॥ विश्वा० ॥ तत्कथितमेव मया भवता तु न सम्यगवधारितम् । शृणु तर्हि पुनः सावधानम् ॥ अंभोराशिं वानरा लंघयंति त्वित्येव व्याजीकृत्य राजीवनेत्रः ॥ अंहोराशौ लंघनार्थं नराणामंभोराशौ सेतुमुच्चैरबध्नात् ॥ ७८ ॥ पुनर्निरूप्य ॥ न सागरोऽसौ नभ एव फेनव्रजान्वितामी विपुलोडुवर्गाः ॥ न सेतुरेषोऽपि निशाचराणां नृपालकानामपि धूमकेतुः ॥ ७९ ॥ पश्चात्र जलचरभ्रमचमत्कारः ॥ गजेन्द्रबुद्ध्या नलसेतुशैलान्ग्राहा ग्रसंते जलधौ वसंतः ॥ तद्ग्रासजायाससमुत्थदंष्ट्राव्याधाः प्रधावंति यथागतं ते ॥ ८० ॥ पुनर्विचिंत्य ॥ डिंडीरखंडान्वयपांडुराभं द्राघिष्ठमुच्चैः परिणाहवंतं ॥ काकुत्स्थसेतुं कलयेद्गुणाढ्यं धौतोत्तरीयं धृतमर्णवेन ॥ ८१ ॥ १ पक्षरहिताः शत्रुभक्तश्च २ कामबाणैः बहुभिर्वायुभिः ३ सौंदर्यसारत्वं ४ विशालता ॥ ॥

यहू॥ चिराद्धराभूरिभरार्तमूर्तिर्हरिस्तदारित्ववर्धितनैजकृत्यः॥ अमसस्यायार्णववारिशीतेशेतेसकिं सेतुमिषेणशेषः॥८२॥ विमृश्यसंश्लाघम्॥ यः पु
रापापदृशकच्छेदे साधनतांगतः॥ ससेतुर्नेकवंशशक्तः पापपंचकभंजने॥८३॥ दूतिपरावृत्यान्यतोवलोक्यसामोदम्॥ तापविलुंपतिनृणामिह ता
म्रपर्णीत्यामस्यावदन्नघदवानलजृंभणोत्थाम्॥ पाथोनिधेस्त्रिजगतिप्रथितोवरोधेरोधोल्लसत्परमहर्षमहर्षिपूगः॥८४॥ तदभ्यर्णे निर्वर्ण्य॥ चका
स्तिकुरुकापुरीशुचिनिताम्रपर्णीतटे विरक्तपरिपन्थिमन्त्रियुगंभक्तिभिर्वैष्णवैः॥ दृढव्रतशठारिर्यो वकुलसंपतद्भृंगरध्वनिहिगुणजृंभणद्राविडवे
दघोषोज्ज्वला॥८५॥ अत्रस्थानां हरिभृत्यानामित्यमनुसंधानम्॥ परिदृष्टवतेसहस्रशाखापरमां द्राविडसंहितांहितानः॥ गुरवेकरवामनित्य
मस्मैशठकोपायमहर्षये प्रणामान्॥८६॥ अंचामविंचातरुमद्भुतंतंपंचामरद्रुनवधीरयंतम्॥ शठारिसंतं किलयस्यमूले तपःफलं किंचिददं
चितंनः॥८७॥ दिशन्नश्रितानाममृतात्मकंफलं विलक्षणो भातिसतिंतिणीतरुः॥ सहस्रशाखंद्राविडागमंसृजन् सयस्यमूलंसमुपाश्रितोमुनिः
॥८८॥ हरिमिवकृतविवरणं वकुलाभरणं वृणीमहेशरणम्॥ ध्येयंयं विदुरार्यामुमुक्षुभिर्यत्प्रबंधमध्येयम्॥८९॥ नत्विमन्वातिर्मस्तकदृशा शठारे
॥९०॥ हरिमिवकृतविवरणंवकुलाभरणं...
मापेतवधीरिहृदयस्यगाथाः॥ प्रह्लयदेहप्रथयंतिदिव्येपदेहेमन्नादइतिप्रगीतम्॥९०॥ कृतदुरितनिरोधानांकलितश्रुतिमौलिभावबोधानां
॥ वशितस्मानोवानानस्सभापिसमाशठारिगाथानम्॥९१॥ जनानुद्दिश्य॥ कठिनशठनरेन्द्रस्तांवकान्भ्रष्टोकपाशान्जठरपिठरपूर्तिजातुमा
संगदृप्ताः॥ त्रुटितहृदतमस्केमात्वसंस्कारकूपेपठतशठजिदुक्तीरश्रमानीतमुक्तीः॥९२॥ कृशानुमामंत्र्य॥ ननुशठकोपायत्वंप्रणतिप्रासाप
भावकोपायत्वम्॥ विमलमतेकुरुकायान्निरसितुमंहोविराजतेकुरुकापाम्॥९३॥ किंच॥ बकुलाभरणीयानांगाथानांसम्मुखेनभरणीयाना
न्॥ हरिगृहमध्येनोस्वरेणपुनतेप्रपंचमध्येतारः॥९४॥ सश्लाघं॥ विरक्तेरास्थानीमधुमथनभक्तेर्नटनभूर्विमुक्तेर्निश्रेणीसुकृतपरिपक्तेःफलमसौ॥

टी० १ पापेभ्यःश्रेशकोटरशमूर्भोरावणः पंचमहापातकानिस्वल्यानिपंच २ अल्वारितिर्नहरीतितद्देशप्रसिद्धिः ३ विष्णुः ४ धिकुर्वतं ५ एतन्नामकपुर्यां ६ उच्चस्वरेण ७ राजधानी ८ रंगभूमिः॥

।-टू २८

२८

मपत्तेरुद्यानसितिरकृतकोल्कैः प्रियसखी चिदंकूरसोणीबकुलधरवाणी विजपते ॥९५॥ समंताद्वलीक्यसानंदम्॥ कृशानुमुद्दिश्य॥ अभ्य
स्तवेदमौलिभ्यः सद्धः स्तुत्वबुभुत्सया ॥ कुरुकापुरवासिभ्यः कुरुकामंनमस्क्रियाः ॥९६॥ कृ०॥ सत्यमेवं॥ तथापि पुनरत्तिपातितेक्कतिस्मृतयो
यतयोपि कतिचिदत्रवर्त्तते इतिनभातीहमाननीयता॥ तथाहि॥ नसंध्यासकृत्स्नानंतिसृषुनकमेडल्वभिधृतिर्नचातुर्मास्याद्व्रतमपिनभिक्षा
टनविधिः॥ नलिंगायायास्यागोनपरिपठनंचोपनिषदांयतित्वंतन्वैषांश्रुतिमतमतिक्रम्यचरताम्॥९७॥ नकेवलमेतावदेवभृशुतावदन्यदपि
॥ संन्यासाश्रममाश्रितोपि सकलव्यापारलोपात्मकं कैंकर्यंचपलो हरेरपदिशन्द्राग्राजधानींविशन्॥ अर्थानर्जयतिश्रितोजितमठोमृष्टा
न्नमश्नात्यसौकोमृष्येदिहरामरामतंदिटकष्टंकलेम्ब्वेष्टितम्॥९८॥ किंबहुना॥ अन्यान्यमस्ति किमितोपिहतेकत्रोपतसंन्यासिनोविद
धतिगृहिणांप्रणामान्॥ एतेत्तुचेतइहकृततातिवैष्णवासाक्तिप्रत्रभूद्धमयमतिनंमतिहिजोयत ॥९९॥ विं०॥ सखेमैवंभाषिष्ठाः॥ इत्थं तुदंत
यतिनः कतिचिन्नोग्रमज्जंतुभैक्ष्यचरणंकलयंतुमावा॥ हर्यंघ्रिपंकरुहकिंकरतारताश्चेदेकप्रसक्तिरकलंकहृदांकृतेषाम्॥१००॥ य
त्पुनरभिहितंफणिवरपर्यंककैंकर्यार्थपर्यटनमपितुर्याश्रमाननुगुणमितितदपिनिपुणनिरूपणविरहविजृंभितम्॥ केवलंपंकजलोचनकैंक
र्यैकवपर्यवलंबते॥ संन्यासिनइहधन्यास्तेहिस्वतउपगतस्पृहाविरहाः॥१॥ इत्थंहिहेयोपादेयविदउदाहरंति॥ भोगायैवनितंबिनीपरिण
योयागाहुतिः ख्यातयेस्वार्थपाककृतिः कुपात्रविषयेत्यागार्थमर्थार्जनम्॥ स्वाध्यायाध्ययनंप्रतिग्रहकृतेवादायशास्त्रश्रमोदुष्येत्स्वोदर
पूर्तयेयदिहरेः कैंकर्यमाचर्यते॥२॥ अन्यच्च॥ भूयोदोषैरपिपरिवृतः पूरुषः सात्त्विकानांप्रायः पूज्योभवतिभगवद्भक्तिमासाद्यहृद्याम्॥९
आक्रांतापिप्रबलभुजगैः कंटकैरप्यनल्पैः किंनाहृत्यासुरभिकुसुमाकेतकीभाग्यभाजाम्॥३॥ इत्यन्यतोभिक्रामन्समंताद्वलोक्यसा
नंदबंधम्॥ क्रियासार्थितवेदेभ्योग्राह्यपद्मःकृतीवहृन्॥ ॥टी०॥ १अतिक्रांतश्रुतिस्मृतयः २अनिंदुःस्वाङ्गारोपं ३द्वेषः ४त्रिण्णुः ५भ्रमंति ६साज्यग्राह्ये ॥९

वे०द० पांड्यचोलनिवासिभ्यः पंडितेभ्यो नमोस्तु वः ॥४॥ टी० ॥ सत्यं पुनर्मत्स्यमरणाम् अप्येषां न रोचते नमस्क्रियायदेषु मिथ्यावादिन एव बहुलमुपल
२९ भ्यंत अमी खलु प्रामाणिकमप्यर्थं दूरीकृत्याप्रामाणिकमर्थमुररीकुर्वंति । तथाहि ॥ प्रत्यक्षगोचरमशेषमपि प्रपंचं मिथ्येति मायिन इमे प्रतिपा
दयंति ॥ सर्वप्रमाणसरणीमतिवर्तमानं कस्याप्यपेति च परं बत निर्विशेषं ॥५॥ पुनः सदोषं हृतब्रह्मबंधवदमे ब्रह्मणेपि परस्मै द्रुह्यंति ॥ यतः
॥ यदेव सर्वेश्वमपास्तदोषं भवार्तिहारि श्रुतिमार्गमीते ॥ अज्ञं परं ब्रह्म तदेव भुंक्ते संसारतापानिति संगिरंते ॥६॥ न केवलममी परस्मै द्रुह्यंति ॥
किंतु ॥ तत्प्रमाणेभ्यः श्रुतिभ्योपि यतः ॥ मिथ्यार्थवेदकत्वाच्छ्रुतिषु कुमतिभिः कर्मकांडे निरस्तप्रामाण्ये ब्रह्मकांडे सह गुणवचनैः शेषितो ब्र
ह्मशब्दः ॥ मिथ्यार्थासिद्धिनिर्भक्तिः प्रकृतिरपि परं ब्रह्म नैवाभिधत्ते वाच्यत्वाभावयत्वात्कथमुपनिषदां मानतां जानतां ते ॥७॥ परमेते श्रुतिभ्यो
न द्रुह्यंति किंतु शारीरकायाश्च अपि ॥ पराशरसुताशास्त्रं तत्त्वज्ञानाय निर्मितं ॥ असमंजसतां नीतमद्वैतब्रह्मवादिभिः ॥८॥ किंच ॥ यादृशः स्वभा
वः सर्वेभ्यस्तद्विपरीतमेवमुशंति विरुद्धमतय एते ॥ सर्वज्ञमज्ञ इति सर्वपदाभिधेयं कस्याप्यवाच्य इति सर्वमहागुणानां ॥ स्थानं च निर्गुण
इतीह समस्तवेदवेद्यं त्ववेद्य इति तं जगदीशमाहुः ॥९॥ किं बहुना ॥ विविधद्विरतव्रातस्फीतस्थिरव्यसनाकुलाद् इति मितमतेर्जीवादेवाभि
दां परमेशितुः ॥ अपगतपरिच्छेदामोदांबुधे रूपगुच्छतामशकशिशुकाभेदो न स्यात्कुतो मदहस्तिनः ॥१०॥ अपरं च ॥ दृश्यं मिथ्या दृष्टि
कर्तापि मिथ्या सेषो मिथ्येत्येव पाधीरमीषां ॥ साधिष्ठानाशेपि किन्नेति चिंता साधिष्ठानां पीडितानामुदंति ॥११॥ वि० ॥ वयस्यमेवं महीसुरदूषणेषु
विजृंभिष्ठाः ॥ पारंपर्यत आगतो निजकुले पंथा न हातव्य इत्यद्वैतं परिगृह्य दृढं तज्जगतो मिथ्यात्वमाचक्षते ॥ अध्येतु निगमान शेषुत्त इमान्कर्माणि
निष्ठां तु मध्यास्ति क्याच्चतुरानिकाममितरे केवावदे तादृशाः ॥१२॥ किंच ॥ श्रुतीरध्येतारः किमपि वदितारः प्रति दिनं क्रतूनाहर्तारः किमपि जपिता
रो मंत्रगणं ॥ ॥टी०॥ १ गुणमूल्यं २ दुर्ब्राह्मणाः ३ वेदांते ४ अभिधेयशून्यासंस्कारकार्याभावात् ५ प्रामाण्यं ६ तर्कयंति ७ अधिष्ठानसहिते ८ उत्तमानां ९ वाज्यः १० संपादयि
तारः ११ मेक्षः ।

अमीस्मार्तोश्चाद्वान्बधिरचयिताशेविधुनुतेश्कनेरप्रामाण्यंप्रसजंदननुष्ठापकतया॥१३॥ टं०॥समंतादवलोक्यनिस्तलाअमीविषयाः शैवप्रचुर
तयानश्लाघामर्हंति॥अत्रह्वितत्वहितपुरुषार्थोनुपयावस्थिता   नभिदधानाः शैवाविदुषोपिविमोहयंति॥ तथाहि॥ मदनजनकेषी
तातंकेमहाद्गुणसेवधीपरमपुरुषेनित्यासक्तांश्रुतिंकमलामिव॥ बतपशुपतौमूलोपेतौमनोभवदाहके विहितहृदयांशैवाजल्पंत्यभाग्यहता
इव॥१४॥सूरादारोग्यमिच्छेत्कमपिहुतवहात्संपदुल्लासमिच्छेदीशात्लातज्ज्ञानमिच्छेज्जनवधिविभवमोक्षमिच्छेन्मुकुंदात्॥इत्याद्याः सत्यषा
चादिमुनिभणितीराकलय्यापिविष्णोः सेवांशैवास्त्यजंतीबतभवहतयेभावयंतेभवंते॥१५॥अपिच॥ तद्विष्णोःपरमंपदंहितमसःपारेसदाप
श्यतांसांद्रंसूरिगणेननिर्मलमहानंदात्मकंशाश्वतं॥अत्रेप्संतद्भ्रमेसमंतमनिशंवेतालभूतालिभिर्लोकंभीकरमंवितुल्यवसितामाहेश्वरंनश्वरं॥
॥१६॥वि०॥सत्वेगुणग्रहकुतूहलीभूताः॥निस्पंकर्मसमाचरंतिनिगमानशास्त्राणिचाधीयतेसंतर्पयंतिचसप्ततंतुनिचयंधिन्वंतिभक्त्यातिथीन्
॥सार्वज्ञ्यंचकमप्यंतिशमचयःशैवाः सदैवादरात्स्वामीदृशाधर्मणांकतिपयेदोषाविषत्वानकिं॥१७॥ अन्यच्चश्रोतव्यं॥स्मरहरपरिचर्यासोप्र
तंतन्यतेयाजनयतिहरिभक्तिंहंतजन्मान्तरेसा॥शमितदुरितवर्गसाच्चसूतेपवर्गंकृतइवफलहानिःकुर्वतांशार्वपूजाम्॥१८॥ परंतु॥साक्ष्यभ
क्तिविनतोतिभद्रायाविष्णुविहेपलवासहिष्णुः॥त्वएवधर्मायभवंतिदाराःकदापियान्नाभिमृशंतिजाराः॥१९॥शैवश्चापिहेषएवहिमूर्द्धाभिषिक्त
दोषःपुरुषाणां॥पश्य॥नास्तिकयमावहतिनारकमातनोतिप्रौढिंनिहंतिपरिलुंपतिसंपदंच॥आयुःक्षिणोत्यपचिनोतिचसर्वदोषान्हरेमुकुं
दविषयोविषयोगतुल्यः॥२०॥टं०॥तथ्यमेतत्तथाप्यवैदिकव्रतेष्वेवप्रपततांशिवभक्तिमभिनयतांपाषंडविशेषाणामेषांवेशएवभीषयति
हृदयं॥तथाहि॥श्रिताभव्यमार्गाश्चिताभस्मपुष्पचिटालाजटालास्फुटालापशून्याः॥श्मशानाग्निसक्ताहशानिर्दहंतःपिशाचाइवामी
१प्रसक्तं २संसारनिवृत्यै ३अनिच्छतः ४युक्तं ५तवनिमय ६तर्पयंतिभोजनादिना ७प्रसिद्ध ८पोषयति ९मुकुंदसंबंधी १० अमंगल ११अत्यारक्तपेत्यर्थः॥ ४

दिग्भ्रमसुभ्रमं निभं किं चैषामतिजुगुप्सिता रीतिः ॥ परीक्षत्यगिरीशं सिद्ध्यारहिताश्रमा नहीनाश्वा ॥ इच्छन्त्यधिगन्तुमिमे धनं जयं लिङ्गदर्शने नैव ॥ २१ ॥
अन्येत्वत्र ॥ दीर्घवक्रनखरं रखरकल्पाङ्गरं तद्वद्बाहुयुगं ते ॥ शौचमाचरितुमप्यसमर्था नीवबुद्धिहृदपाविहरन्ति ॥ २२ ॥ वि॰ ॥ विमृश्य सखेगु
णग्राहिणा नैतेपि दूषणीयाः ॥ शीतोष्णजृम्भणसहेषु जितेन्द्रियेषु कष्टोपवासपरिशुष्ककलेवरेषु ॥ पुण्यस्थलाटनपराकृतकिल्बिषेषु जानीहि का
नपि गुणान् जटिलेष्वमीषु ॥ इत्यन्यतो वीक्ष्य साशोकं ॥ कई मे पुस्तकहस्ताः कल्पएवोत्थाय नतत्वतः पर्यटन्ति ॥ २३ ॥ कृ॰ ॥ निपुणमवलोक्य सप
रिहासं ॥ ज्योतिःशास्त्रमहोदधौ बहुतरोत्सर्गापवादात्मभिः कल्लोलैर्निबिडे कणान् कतिपयान् लब्ध्वा रुतार्थाइव ॥ दीर्घायुः कृतसंपदादिक
थनैर्दैवज्ञपाशा इमे गेहे गेहमनुप्रविश्य धनिनां मोहं मुहुः कुर्वते ॥ २४ ॥ किंच ॥ विलिखति सदसद्वा जन्मपत्रं जनानां फलति यदि तदा नीं दर्शय
त्यात्मदास्यं ॥ न फलति यदि लग्नं द्रष्टुरेवाह मोहं हरति धनमिदैवं हंत दैवज्ञपाशः ॥ २५ ॥ अपिच ॥ प्रमोदेखेदेवाप्यसुपनमति पुंसो विधिवशान्म
यैवं प्रागेवाभिहितमिति मिथ्याकथयति ॥ जनानिष्टानिष्टाकलनपरिहारैकनिरतान् सौमेषा दीनान् परिगणनयैव भ्रमयति ॥ २६ ॥ अस्तु तावत
थ्यवादी दैवज्ञस्तथापि रम्यातहूवः श्रवणं ॥ तथाहि ॥ अकृत्वमथ सुखं वा कर्मणां पङ्क्तिवेलास्वहह नियतमेते भुञ्जते देहभाजः ॥ तदिह पुरत
एवप्राहमाहूर्तिकश्चेत्कथय फलममी षामंततः किंततः स्यात् २७ ॥ वि॰ ॥ ऐहिकमुष्मिककर्मारंभोपयोगिनो नोपालंभमर्हन्ति ज्योतिर्विदः ॥ शृणुता
वत् ॥ नदैवं नेपित्र्यं चकर्मावसिध्येन्न यत्रास्ति देशेन नुज्योतिषज्ञः ॥ नतारा न वारा न वा नागृह्णणां नतिथ्यादयो वायतस्तत्र बुद्धाः ॥ २८ ॥
यच्च समर्थितं मौहूर्तिकवचननिशमनं मुधेति तन्निपुणानभणोति ॥ भानोः शीतकरस्य वापि भुजगग्रासे पुरो निश्चिते तीर्थानामटनं जनस्यापि
वृते तापत्रयोच्चाटनं ॥ दृष्टे मागवधारितेसति धृते तु दृष्टे भ्रलाभो भवेत् दृष्टे तु व्यसनेत्र तत्परिहृतिः कर्तुं जपाद्यैः समा ॥ २९ ॥ अविश्रंभस्त्वद्दै
टी॰ ॥ १ अभिप्रायपरंकृत्वा २ अनुमानसिद्धि अप्रसिद्ध्यन्यतमी ३ सत्कारः अनुमानं च ४ अग्निधनंजयं चेति पृथगपि ५ परिपाकः ६ राहुकेतुभ्यां ॥ ॥ ॥

वन्नुवचनेषुअनुपपन्नः। वृद्धिह्रासौकुमुदसहृदःपुष्पवंतोपरागःशुक्रादीनामुदयविलयावित्यमीसर्वदृष्टाः॥ भावि ष्कुर्वंत्यखिलवचनेष्व
त्रकुंभीपुलाकन्यायान्ज्योतिर्नयगति विदनिश्चलमानभावं॥३०॥ इत्थंकिलनीतिविदोविदुः॥ विदेवज्ञग्राममविबुधविधुरांभूपतिसभांमुखं
श्रुत्वाहीनमनुजपतिशून्यंचविषेयम्॥ अनाचारान्दारानपहरिकथकाव्यमपिचप्रवक्तृत्वौपेतेगुरुमपिसकुद्धिः परिहरेत्॥३१॥ कु०॥ अ
स्त्वेवमित्यन्यतोपीस्यसोपहासं॥ मिथ्यौषधैर्हतमृषाकषायैरसत्यलेह्यैरयथार्थतैलैः॥ वैद्यादुमेवंचितरुग्णवर्गः पिचंडभांडंपरिपूरयं
ति॥३२॥ किंच॥ नधातोर्विज्ञानंनचपरिचयोवेद्यकनयनगे गाणांतत्त्वावगतिरपिनोवस्तुगुणधीः॥ नथाप्येतेवैद्यादृतिनरलयंतोजडजं
नानसूनमृत्योर्भृत्यादृववस्कहरंतेगदजुषाम्॥३३॥ अपिच॥ कषायैरुपवासैश्चकृतामुल्लाघतांनृणाम्॥ निमित्तधकृतांवैद्योनिवेद्यहरते ध
नम्॥३४॥ वि०॥ वयस्यविश्वोपकारिषुवैद्येष्वेवंनकलयेथाः॥ पथ्या॥ मैस्तदूनसहवेदनाकवलितेमग्नेस्वरेतगतेतप्तायांज्वरणावकेनचेत
नौतीतेतृषीकव्रने॥ दूनेबंधुजनेकृतप्रलपनेधैर्यविधातुंपुनः कःशक्तःकलितोमयप्रशमनोवैद्यात्परोविद्यते॥३५॥ किंच॥ मावोधिवैद्यकम
थापिमहामयेषुप्राप्तेषुयोभिषगितिप्रथितस्तमेव॥ आकारमस्यविलसव्यविशेषदर्शीलोकोपितेनभिषगेषुनदूषणीयः॥३६॥ कष्टम होत
तोपकारेप्यगदंकारेकृतघ्न एव निर्विवेकोलोकः इत्यंहिकवयःकथयंति॥ निर्वृत्ताध्वरकृत्यकृत्विजमहोत्तीर्णापगोनाविकंयुद्धांतसभटंच
सिद्धविजयोपोढारमासस्थलः॥ रूढंवारवधूजनंचकितवोनिर्धृष्टतद्योवनोध्वस्तातंकचयश्चिकित्सकमपिद्वेष्टिप्रदेयार्थिनम्॥३७॥ कु०॥
विमानमग्रत श्चालयन्॥ अग्रतोवलोक्यसोपालंभंसखेपश्यात्रकवीनामेषांशास्त्रैर्विप्रतिषिद्धांचर्यां॥ श्रीनाथस्तवनानुरूपकवनांवाणींम
नोहारिणींकथंहकवयः कंदर्पकुटिलस्यापालसात्कुर्वते॥ दूरोपाहृतसारसेधवपथादेवाभिषेकोचितंसंसेकेविनियुंजतेसमतयःशास्त्रा

१स्थालीपुलाकन्यायेन २देशः ३रोगिवर्गः ४उदरभांडं ५भ्रामयंतः ६नीरोगतां ७मस्तके ८मूर्च्छिते ९दुःखिते १० शकटाम्बादिपालकं ११ क्षपणाः १२ नृपवर्णनपरां ॥ ॥॥

लवालस्य किम्॥३८॥ किंच॥ स्तवबन्धनिर्वर्तके सति हरौ कविः सूक्तिभिः करोति वरवर्णिनीचरितवर्णनं गर्हितं॥ अनीतिरवनीपतिर्वतशुनी तनुं मौक्तिकैर्विभूषयति देवतामुकुटभागयोग्यैर्यथा॥३९॥ वि०॥ आंतरध्वांतरवयः कवयस्तव मानाधिक्षेप्याः कामं वाचः कतिचित्फलाः संतु लोके कवीनां सत्यैवान्या मधुरिपुकथासंस्तवात्कामदोग्ध्री॥ वित्तं कामं भवतु विफलं दत्तमश्रोत्रियेभ्यः पात्रे दत्तैर्भवति हि धनैर्धन्यता भूरिदातुः॥४०॥ कल्याणं भगवत्कथाकथनतः काव्यं विधातुः कवेस्तस्यैवागतया क्वचिद्रचयतः शृंगारवीरादिकम्॥ को दोषो भविता यदत्र कविताशीलैः समाश्रीयते पंथा व्यासवसुंधराश्रुतिभवग्रंथादिषूदितः॥४१॥ कृशा०॥ नरस्तुतेर्विधातारो न वस्तुत इमे बुधैः॥ श्लाघनीया इति कवीन् शास्त्रे ध्वन्यो विनिंदति॥४२॥ कि०॥ धनचपलसकलपुरुषसाधारणमिदं दूषणमविवेकिभिः कविष्वेव केवलमाधीयते॥ यतः॥ पद्यैर्हृद्यतमैः स्तुवंति कवयः प्रायेण पृथ्वीपतीनन्ये तान्स्तुवते वचोभिरचमत्कारैरसारैरपि॥ पद्यारंभणशक्त्यशक्तिभिर्हि वो भेदः कवीनां भवत्यन्येषां च परं नरस्तुतिकृतो दोषश्च सार्वत्रिकः॥४३॥ क्षणमालोक्य सादरम्॥ प्राचेतसव्यासपराशराद्याः प्राचः कवींद्रा जयदेवितास्ते॥ गोष्ठीनवीनामपि महाकवीनां पूज्या गुणज्ञैर्भुवनोपकर्त्री॥४४॥ तथाहि॥ माघश्चोरो मयूरो मुररिपुरपरो भारविः सारविद्यः श्रीहर्षः कालिदासः कविरथ भवभूत्याढ्यो भोजराजः॥ श्रीदंडी डिंडिमाख्यः श्रुतिमुकुटगुरुर्भल्लटो भट्टबाणः ख्याताश्चान्ये सुबंध्वादय इह कृतिभिर्विश्वमाल्हादयंति॥४५॥ परंतु॥ संपन्निर्मदभावयोरनघयोः साहित्यपांडित्ययोः सामर्थ्यान्यजनोपकारकतयोः साम्राज्यदाक्षिण्ययोः॥ औदार्यप्रियवादयोश्च कथयंत्याचारविज्ञानयोः सामानाधिकरण्यमेव विबुधोत्तंस प्रशंसास्पदम्॥४६॥ इदं चावधेयम्॥ प्रणतचरणरेणुर्विष्णुचित्तो शठमथनः सरसीमुनिः सभूतः॥ मधुरकविरितोपरे च धन्याः कति न पुनंति जगंति सूक्तिपूरैः॥४७॥ कु०॥ परतो विमानं प्रस्थाप्य पार्श्वनो दृष्ट्वा१ शेषतानाग्रहिणः पुरुषान् यदेते व्यर्थमेवन्यायग्रंथसंततचिंतनेन विश्राम्यंति॥ टी० १ वसुंधराश्रुतिर्लक्षणया वल्मीकं तत्र भवो वाल्मीकिः २ शास्त्रमार्गसंचारी ३ मदरहितं ४ [illegible]॥

तथाहि॥ कर्मब्रह्मविचारणां विजहतो भोगापवर्गप्रदां घोषं कंचन कंठशोषफलकं कुर्वंत्यमी तार्किकाः॥ प्रत्यक्षं न पुनाति नापहरते पापानि पीलु-
च्छटाव्याप्तिर्नावति नैव पात्यनुमितिर्नो पक्षतारक्षति॥४८॥ किंच॥ हेतुः कोपविशिष्टधीरनुमितो नज्ञानयुग्मं मरुल्लोचो नेति च मोहवादमुखरा
नैयायिकाश्चेद्बुधाः॥ मेषस्याण्डमियत्प्रलंबलिभुजो दंताः कियंतस्तथेत्येवं संततचिंतनैश्रमजुषो न स्युः कथं पंडिताः॥४९॥ विशिष्यैवमस्पष्ट-
वक्तार्किकस्य रीतिर्विवेकि नामुपहासास्पदं॥ शृणु तावत्॥ नजिघ्रत्याम्नायं स्पृशति न वदंगान्यपि सकृत्पुराणं नादत्ते न यमयति किंच स्मृति-
गणम्॥ पठन्शुष्कं तर्कं परपरिभवार्थोक्तिभिरसौ न यत्यायुः सर्वं निहितनपरलोकार्थयतनः॥५०॥ अपिच॥ प्रबले रस्तोके :परिचितकुतर्कप्रक-
रणाः परं वाचो वश्यान्कतिपयपदौघान्विरधतः॥ सभायां वाचाटाः श्रुतिकटुरटंतो घटपटान्नलज्जंते मंदाः [illegible]यमपि तु जिह्रेति विबुधः॥५१
वि०॥ वयस्यविविधोपकारविधायकान्नैयायिकान्मावमंस्थाः॥ शृणु॥ मोहं रुणद्धि विमलीकुरुते च बुद्धिं सूते च संस्कृतपदव्यवहारशक्तिं॥
शास्त्रांतराभ्यसनयोग्यतया युनक्ति तर्कश्रमो न तनुते किमिह्रोपकारम्॥५२॥ तथाहि॥ प्रायः काव्येर्गमितवयसः पाणिनीयांबुराशेः सारज्ञस्या-
प्यपरिकलितन्यायशास्त्रस्य पुंसः॥ वादारंभे वदितुमनसो विद्वदग्रे सभायां प्रह्वा जिह्वा भवति कियती पशुपकष्टामवस्थां॥५३॥ किंबहुना॥ अ-
परीक्षितलक्षणप्रमाणैरपरामृष्टपदार्थसार्थतत्वैः॥ अपरीक्षितअत्रयुक्तिजालैरलमेतैरनधीततर्कविद्यैः॥५४॥ निरूप्य॥ अक्षुतत्वे केपाथो-
धिरगाधो यस्य वर्धकः॥ अक्षपादोतमस्पृष्टस्तत्वकलंकः कलानिधिः॥५५॥ पुनरालोच्य सश्लाघम्॥ ज्ञानाब्धिरक्षिचरणः फणिभिक्षकश्च श्रीप-
क्षिलोप्युदयनः स च वर्द्धमानः॥ गंगेश्वरः शशधरो बहवश्च नव्याग्रंथैर्व्यरुध्यत तुरमेहदयाधकारं॥५६॥ क०॥ अपरत्र व्योमयानेन प्रस्थापयन् अय-
नो निरीक्ष्य सोपालंभं॥ मीमांसकाः कति चिदत्र मिलंति वद्प्रामाण्यसाधनकृतोपिनतेभिवंद्याः॥ ॥टी०॥ १ परमाणुसमुदायः २ व्याप्तिविशिष्टप-
क्षधर्मताज्ञानविशिष्टः ३ पूर्वोक्तमनांशहूयं ४ त्वगिन्द्रियप्रत्यक्षः ५ काकः ६ लज्जते ७ अज्ञातपदार्थसमूहजालैः ८ जयमुक्ति ९ राहुः अज्ञानं च॥ ॥ ॥

उद्घोषितोप्युपनिषद्भिरशेषशेषी ब्रह्मैव नाभ्युपगतः पुरुषोत्तमो यैः ॥५७॥ विशिष्य च मीमांसकानां गोष्ठ्यां विश्रुताः शबरादयः शबरादय इव मगवद्भक्तानां विनिंदनीयाः ॥ ते मीमांसाशास्त्रलोकप्रसिद्धाः सर्वेषीणां से हि रे नैव सत्ताम् ॥ चैतन्यस्यापन्हुवं देवतानां चक्रुर्विश्वे नश्वरं मन्यमानाः ॥ ५८ ॥ वि० ॥ सखे निखिलनिगमार्थनिर्धारणबहादरेषु मीमांसकेषु मास्म सन्नह्येथाः ॥ शृणु ॥ आदौ धर्मप्रमाणं विविधविधिभिदाशेषतां च प्रयुक्तिं वापर्याधिकारीं तदनु बहुविधं चातिदेशं तथोहं ॥ बाधं तंत्रं प्रसंगं नयननपरास्तैः सम्यगालोचयद्भ्यो भिन्ना मीमांसकेभ्यो विद इति भुवि केवलादरं वेदरक्षां ॥५९॥ पश्यपनावद्भगवतद्वज्जैमिनिशासनं वैदिकैः सर्वैर्निर्विक्रमणीयं ॥ नैयायिकावानन्तुशाब्दिकावात्रयीशिरः सु श्रमशालिनी वा ॥ वांद्या हवेविश्रुतिर्जैमिनीयन्यायोपरोधे सति मौनमुद्रां ॥६०॥ यन्मीमांसकेषु दोषोद्घाटनं तद् तानतः । भगवदनभ्युपगमनं दैवतचैतन्यनिन्हवश्चैषाम् ॥ कर्मश्रद्धावर्धकतत्प्राधान्यप्रदर्शनायैव ॥६१॥ पुनरालोच्य सबहुमानं आगमरूपविचारिण्यधिकरणसहस्रे प्रशिक्षितविपक्षे ॥ साम्यमिनि जैमिनियोगिन्यपरज्ञानिहृदयमस्मदीयमिदम् ॥६२॥ शाबरकुमारिलगुरवो मंडनभवदेवपार्थसारथयः ॥ अन्येपि विश्वमान्या जयंति संप्रापमाणतंत्रास्ते ॥६३॥ कृ० ॥ अस्ति तिविमानमन्यतो गमयन्नूपाश्वतौ हृष्वा सोपहासं ॥ टिद्वाणन्नहयसज्वुट्डीसंड सोस्ति पतसक्षिसिप्र यसयमिपृवसमस्तहसिवष्टनाष्टुरतङ्ञ्शच्छ्वोत्यचोत्पादिति ॥ लोपो व्योर्वलि शूद्विरेचियचिभंर्दधाघ्वदापङ्केचटेरित्यब्दान्नखिलान्नयतिकति विच्छुब्दान्पठेतः कटून् ॥६४॥ किंचासूत्रैः पाणिनिकीर्तितैर्बहुतरैर्निष्पाद्यशब्दावलिं वैकुंठस्तवमसम्यग्रचयितुं मिथ्याश्रमाः शाब्दिकाः ॥ पक्कान्नं विविधक्रमेण विविधापूपाग्र्यसूपान्वितं मंदाग्नीननुरुंधते मितबलाना घ्रातुमप्यक्षमान् ॥६५॥ वि० ॥ न्यप्याभरणेषु वैयाकरणेषु भावान्मास्मकल्पयतु दोषशंकलयतः । कृतदुरितनिराकरणं व्याकरणं चतुरधीरधीयानः ॥ बुधगणगणनावसरे कनिष्ठिकायां परं जयति ॥६६॥ पातंजले विष्णुपदापगायाः पातंजले चापि नयेष्वमाहं ॥ टी० १ मतीव पदार्थैः सह्याविचाल्यः २ सएव ब्रह्म इति ३ लोपं ४ बादपुहे ५ न्यायरूपे प्रतिबंधके ६ जोपं ७ क्लेशं ८ पातंजलेभूविविपदेद्दूपं ॥ ॥

आचंसते सुहृदमामसूतेराचसूतेरागमधोसृजेच॥६७॥ अपिच॥ नृणामनभ्यस्तफणाभृदीशगिरांदुरापावुधराजगोष्ठी॥ अबुद्ध्वाप
श्नतिपद्धतीनांपुस्तसमेवोद्धततयोधृसार्थः॥ ६८॥ तथाहि॥ नांगीकृतव्याकरणोप्रधानामपाटवंवांचिसकगाढमास्ते॥ कस्मिंश्चिद्वक्ते
तुपदेकथंचित्तेवरंवपुःस्विद्यतिवेपतेच॥६९॥ साक्षेपं॥ कथंसखेशतकोटिपाणिनिगदितमेवव्याकरणमाद्रियंतेसंतः॥ वि०॥पाणि
नीयमेवहिव्याकरणंप्रयोगोपयिकंप्रविशदप्रनीतिकारणमितितत्रैवादरःपंडितानां॥ तथाहि॥ सूत्रेपाणिनिबद्धकलयत्सुरूपःसमुद्धृ
विसृष्टस्॥ वर्णादीनांधर्मान्बुध्वाविधिवत्सप्रयुक्तेसौ॥७०॥ इतिविमानंअन्यतश्चालयन्पुरोवलोक्यसखेपश्यछात्रंसानर्थचापलेनविक्री
यमाणाम्नायान्॥ आःकष्टमप्रहृष्टाःशिष्टाअपिवित्तचापलाविष्टाः॥अध्यापयंतिवेदानाद्यायवित्तायमारम्भसिभृतिं॥७१॥वि०॥वयस्य
मैवंवादीः॥नाध्यापयिष्यन्निगमान्श्रमेणोपाध्यायलोकायदिशिष्यवर्गान्॥निर्वेदवादंकिलनिर्वितानमुषीवलोकहंततदाभविष्यत्॥ कु०॥
विरुद्धमिदंभाषितंपहेत्तपायेसतिनप्रजाभ्युदयःस्यादिति॥वि०॥अवगच्छतावदेतदविरुद्धमेव॥नाम्नायज्ञोभवेयस्मिन्पनमानतथा
स्थितः॥तत्समागमतःसोपिनाम्नायज्ञोभवेन्नकिम्॥७२॥ कु०॥ पुनरन्यतोदृष्ट्वासोपहासं॥पश्यैतान्राजसेविनःपरित्यक्तलोकदूपसे
व्यान्स्पष्टमौरव्यान्पुरुषान्॥नैषांसंध्याविधिरवि[illegible]माच्युताचापिसांगोनस्वकालेहवननियमोनापिवेदार्थचिंता॥ कष्टं हंत्वा
नियतमशनंनापिनिद्रावकाशोनहोलोकावपितनुभृतांराजसेवापराणां॥७३॥वि०॥ दुःसहैषावहुजनपोषकार्यणोबानिंदा॥ अश्रृ
भपुषिकलावप्यप्रमत्ताःस्वधर्मादनुदिनमुपकारानाचरंतेबुधानां॥बहुजनपरिपुष्टोबहुदीसास्तएवैतनुस्करवमपिहित्वातन्वतेराज
सेवां॥७४॥सर्वाणिदिव्यसत्राण्यवलोक्यसांजलिबंधं॥कृशानुमुद्दिश्य॥गंगाझरीपरिचितांघ्रिजगन्निदानंरंगादिधामसकृदीरितस्तु
टी०॥१वदंति २जननादारभ्य ३मरणांतर ४धनुर्वेदः ५इंद्रः ६उपयोगी ७वेतन ८नआम्नायज्ञइतिच्छेदः ९नाममात्रेणसपज्ञः १०अमुभवकुले॥ ॥

वि॰ द॰ तत्सन्निधानं॥ विश्वं स्वमीशो विशदं मेव विलोकमानं वेदस्य वस्तु नमदार्तिहराभिधानं॥७५॥ कृ॰॥ नन्वत्र तु वीपचरणार्थेन मत्कृतोच्यते॥ वि
३३ श्लेषणे विभोर्यत्स्यविख्यातेषु पंचवनषु॥ सा स्मात्रकृतेषु स्फुटं सर्वशंको तिसंकषंहषि॥७६॥ वि॰॥ सूर्यचंद्रलोचनतया सचमत्कारं चक्रध
रस्तत्वानायतु कल्पयामि॥ शृणु तावदिदं॥ श्रियस्ता यदसंप्रदायरसिकश्चायं सहायः श्रियः श्रीवारलसपत्नवीक्षितलघश्चेतिप्रप
तामायते॥ यो विश्वं नस्त्रिगात्रवान्हिमरुचाप्युष्णांशुनानेत्रवान्कृशीवेण च मित्रवान् कुशलवब्रह्मादिभिः पुत्रवान्॥७७॥ सर्वे सं व
र्ण्यमाणे सारभूतमिममर्थं गृहाण॥ नराः सुरावापि शर्वः नितरनीपाः पुरुषेण भुंजता॥ यतोपि दोषप्रचुरे येन नितरां तु
णाः कलावपि॥ सन्त्यपि गुणसमृद्ध्यै भाण्डतिः समस्तवस्तूनां॥ अस्माभिरुपनिषिद्धोसि तस्यैव पूर्वपक्षी किं॥
इति सकृतजननामौ मीमस्यतो मधुमथनपवित्रक्षेत्रसेवाकृतार्थौ॥ अनुपथि हृदसरव्यौ हंसगंधर्वव्योनिजसदनमगाता
निर्भरानंदसांद्रौ॥८०॥ सकलकुशलसिद्ध्यै सर्वदेवस्थलेषु ब्रजेतु भुवि विवृद्धिं वत्सराद्युत्सवश्रीः॥ अपगतभयरोगैरध्वराणां प्रयोगैरखिल
लसुभकरणां मस्तभद्रं द्विजानाम्॥८१॥ जयतु जगति लक्ष्मणार्यपक्षो जयतु वचः श्रुतिमौलिदेशिकानां॥ निगमवर्त्म निःसपत्नं जय
तु चिरायमुरारिरंजनाद्रौ॥८२॥ प्रकाशदोषकैरप्यमुष्मिन्ग्रंथे मदीये करुणानुबंधात्॥ यस्मादेवं तो न विश्वावसुरंतु संतः
॥८३॥ ॥इति श्रीमद्भवमतभंजननिबंधनव्याख्यातृतातयज्वभागिनेयवाजपेययाजिवप्रष्टासोर्यामादिमौक्तिकश्रीभवद्यप्पयाचार्य
तनूभवश्रीनिवासयज्ञनायकचक्रवर्तिरघुनाथाचार्यदीक्षिततनयस्य श्रीमद्वेंकटाध्वरिणः कृतो विश्वगुणादर्शः समाप्तः॥ ॥शुभंभवतु॥ ॥
टी॰ १ सूर्यचन्द्ररूपचक्षुषपक्षे सिरोगविशेषवत्तया २ पृथक्पदं कर्म ३ अभ्युदयेच्छुना ४ प्रापयंतो ५ पुरोभागिनः नार्थवंतु ६ किं तु विश्वावसुसंवत्सरस्थाः सन्तु गुणग्राहिणः

वे·द॰ वाराणसीप्रसादस्य नियोगेन प्रयत्नतः॥ काशीसंस्कृतमुद्रायामङ्कितोयं शिलाक्षरैः ॥१॥ श्रीकाशीजी मध्ये नवापाकबड़फाटकपञ्चगा
३४ श्वनाथजी के पास श्री ३ युत महाराज शिवलाल दुबेजी के मकान मे काशीसंस्कृतमुद्रायन्त्र मे छपी जिनको लेना होय उन्होने इस कार्य के सं
पादक बाबू वाराणसीप्रसाद याकचौरीगली मे भाई प्रतापसिंहजी के दुकान पर मिलेगी॥ मिती चैत्र शुक्ल ५ रविवासरे संवत् १९३१ ॥ ॥ ॥

॥इतिविश्वगुणादर्शःसमाप्तः॥